पद्मपुराणोक्तवचनमनुसृत्य तु मूलमन्त्रप्रदानानन्तरं द्वयमन्त्रस्योपदेशो विधेयः । ततः चरममन्त्रस्योपदेशोविधेयः । मन्त्राभिप्रायं च शिष्यं बोधयेत् । केवलं मन्त्रोपदेशमात्रेण मन्त्रार्थवाचनेन वा गुरुर्न भवति । किन्तु मन्त्रतत्व बोधनेनैव गुरुः भवति । तत्पश्चात् श्रीरामगायत्री, श्रीलक्ष्मण भरतशत्रुघ्न हनुमतां मन्त्राः उपदेष्टव्याः । श्रीराममन्त्रेण सह श्रीसीतामन्त्रस्यापि उपदेशो विधेयः । श्रीराममन्त्रेण दीक्षितः शिष्यः मन्त्रान्तरान् परित्यजेत् अन्यथा नरक गामी भवति । तदुक्तं नारदपञ्चरात्रे पुष्करसंहितायां च तौ क्रमेण कथ्येते-

"लब्ध्वा षडक्षरं मन्त्रं रामस्य परमात्मनः ।
मन्त्रान्तरान्प्रयत्नेन वर्जयेन्मन्त्रतत्त्ववित् ॥"

"गृहीत्वा वैष्णवात्सम्यङ् मन्त्रराजं षडक्षरम् ।
अन्यमन्त्रं जिघृक्षेच्चेद्रौरवं नरकं व्रजेत् ॥"

आचार्य श्रीराम गायत्री, श्रीलक्ष्मण श्रीभरत श्रीशत्रुघ्न और श्रीहनुमन् मन्त्रो का उपदेश करें । श्रीराम मन्त्र के साथ साथ श्रीसीता मन्त्र का भी उपदेश करना चाहिये । श्रीरामानन्दीय श्रीवैष्णव सम्प्रदाय में श्रीरामाभिन्न श्रीसीताजी एवं श्रीसीताजी से अभिन्न सर्वेश्वर श्रीरामजी को अभीष्टतया स्वीकार किया गया है । अतः श्रीसीता मन्त्र के विना श्रीराम मन्त्र अपूर्ण माना गया है । दूसरी वात यह है कि जो शिष्य एक वार श्रीराममहामन्त्र से दीक्षित हो चुका है, वह अन्य देवता के मन्त्र का परित्याग करे अन्यथा नरक गामी होता है । यह विषय नारदपञ्चरात्र एवं पुष्कर संहिता में कहा गया है । उनका क्रमशः उल्लेख किया जाता है ।

भगवान् श्रीरामचन्द्रजी परमात्मा के ब्रह्मतारक षडक्षर मन्त्र को उपलब्ध कर अन्य मन्त्रों का पूर्ण प्रयास पूर्वक परित्याग करना चाहिये यह मन्त्र तत्त्व ज्ञानी को ध्यान रखना चाहिये । षडक्षर मन्त्रराज को श्रीवैष्णव गुरु से सम्यक् प्रकार धारणकर जो अन्य मन्त्र ग्रहण करने की इच्छा करता है तो वह रौरव नरक में जाता है । पूर्व में संहिता एवं पुराण के वचनों में मन्त्रोपदेश के विषय में तीन वार और एक सौ आठ वार कहा गया है । वह मन्त्रोच्चारण से शिष्य को विशुद्ध अभ्यास हो सके इसमें तात्पर्य है । इसलिये शिष्य के जिस तरह सुदृढ अभ्यास हो उतनी मात्रा पर्यन्त मन्त्र का उपदेश करें । और पञ्चसंस्कार से सुसम्पन्न शिष्य सर्वस्व दक्षिणा से गुरु को

मन्त्रोपदेशे वारत्रयस्य अष्टोत्तरशतवारस्य च उच्चारणस्य मन्त्रस्य विशुद्धाभ्यासे तात्पर्यम् तेन शिष्यस्य यथा सुदृढः अभ्यासः स्यात् तावत् पर्यन्तं मन्त्रोपदेशं कुर्यात् एवं पञ्चसंस्कारैः सुसम्पन्नः शिष्यः सर्वस्व दक्षिणया गुरुं संतोष्य प्रार्थयेत् भगवन्तं श्रीरामचन्द्रम् ।

"तवास्मि जानकीकान्त ? कर्मणा मनसा गिरा ।
रमाकान्त ? तवैवास्मि युवामेव गतिर्मम ॥
मत् समोनास्ति पापात्मा त्वत्समोनास्ति पापहा ।
इति सञ्चिन्त्यदेवेश ? रक्ष मां शरणागतम् ॥
अनायासेन मरणं विना दैन्येन जीवनम् ।
देहि मे कृपया राम ? त्वयि भक्तिमचञ्चलाम् ॥

एवं दीक्षासम्पन्नः श्रीवैष्णवः स्वसामर्थ्यमनुसरन् यथाशक्तिप्रतिदिनं सम्प्रदायानुसारं मन्त्रान् जपेत् ।

जगद्गुरु श्रीरामानन्दाचार्यश्रीरामेश्वरानन्दाचार्यकृतौ
श्रीवैष्णवसंन्यासमीमांसायां पञ्चसंस्काराः सम्पन्नाः ॥१२॥

सन्तुष्टकर भगवान् श्रीरामचन्द्रजी की प्रार्थना करे । हे जानकी कान्त ? भगवान् श्रीराम ? कर्म मन एवं वचन से आपका शरणागत हो जाऊँ हे रमाकान्त ? आप दोनों सर्वेश्वर श्रीसीतारामजी ही मुझ शरणागत की परमगति हैं । मुझ जैसा पापाचरणकारी कोई दूसरा नहीं है । एवं आप दोनों जैसा पाप से उद्धार करनेवाला अन्य नहीं है। हे देवेश इन वातों का सम्यक् प्रकार से विचार कर मुझ शरणागत की रक्षा कीजिये । विना किसी कष्ट की मृत्यु हो एवं दीनता से रहित जीवन हो । हे भगवान् श्रीरामजी और मुझे कृपा पूर्वक आपके प्रति सुस्थिर भक्ति प्रदान करें ।

पूर्वोक्त प्रकार से दीक्षा सम्पन्न श्रीवैष्णव अपने सामर्थ्य का अनुशरण करते हुये यथाशक्ति प्रतिदिन अपनी गुरु परम्परा के अनुसार मन्त्रों का जप करें ।

इसप्रकार जगद्गुरु श्रीरामानन्दाचार्यश्रीरामेश्वारानन्दाचार्यजी की कृति श्रीवैष्णव संन्यासमीमांसा में पञ्चसंस्कार विधि सम्पन्न हुआ ॥१२॥

☫ त्रिदण्डनिर्माणविधिः-धारणविधिश्च ☫

प्रयागजातं द्विजवंशरत्नं त्रिदण्डिमुख्यं लसदूर्ध्वपुण्ड्रम् ।
यतीश्वरं राघवशिष्यमुख्यं रामं मुनिं नित्यमहं नमामि ॥

मेखलाजिनदण्डाद्यैर्ब्रह्मचारीति लक्ष्यते ।
गृहस्थो यष्टिवेदाद्यैर्नखरोमाद् वनाश्रमी ॥

त्रिदण्डेन यतिश्चेति लक्षणानि पृथक् पृथक् ॥ इति दक्षः । अङ्गिरास्मृतौ तु-

यतेलिङ्गं प्रवक्ष्यामि येनासौ लक्ष्यते यतिः ।
ब्रह्मसूत्रं त्रिदण्डं च वस्त्रं जन्तु निवारणम् ॥
शिक्यं पात्रं बृशी चैव कौपीनं कटिवस्त्रकम् ।
यस्यैतद् विद्यते लिङ्गं स यतिर्नेतरो यतिः ॥ लिखितेतु-

☫ त्रिदण्ड निर्माण विधि एवं धारण विधि ☫

ब्राह्मण कुलभूषण प्रयाग क्षेत्र में जन्म धारण करनेवाले त्रिदण्डधारी संन्यासियों में प्रधान जिनका ऊर्ध्वपुण्ड्र देदीप्यमान था यतिराज श्रीमान् राघवानन्दाचार्यजी के प्रमुख शिष्य भगवान् श्रीरामजी का धर्म संरक्षण हेतु धारित अवतार आनन्दभाष्यकार जगद्गुरु श्रीरामानन्दाचार्यजी महाराज को मैं प्रतिदिन प्रणाम करता हूं ।

मेखला मृगचर्म तथा दण्ड आदि लक्षणों से यह ब्रह्मचारी है यह परिलक्षित होता है । दण्ड एवं वेदशास्त्र आदि धारण करने से यह गृहस्थ है ऐसा बोध होता है । नख, केश आदि से वानप्रस्थाश्रयी है यह परिलक्षित होता है तथा त्रिदण्ड धारण करने से श्रीवैष्णव संन्यासी है, इसप्रकार भिन्न-भिन्न लक्षणों से अलग-अलग आश्रमों का परिज्ञान होता है । यह दक्षस्मृति का वचन है । अङ्गिरा स्मृति में तो कहा है कि संन्यासी का चिह्न विस्तृत रूपसे कहुंगा । जिससे यह संन्यासी लक्षित होता है । यज्ञोपवीत और त्रिदण्ड जन्तुओं से रक्षा हेतु वस्त्र झोली एवं वृषि कौपीन तथा कटिवस्त्र ये सभी चिह्न जिसमें हैं वह श्रीवैष्णव संन्यासी है, अन्य संन्यासी नहीं है। लिखित स्मृति में तो संन्यासी कषाय रंग से रंगा हुआ, कपास का बना हुआ वस्त्र और कंथा (विशेष प्रकार का वस्त्र) को धारण करें अथवा वल्कल, मृग-चर्म, रेशमी वस्त्र या सण से बना हुआ वस्त्र शिक्य आवरण के सहित पात्र जो तीन प्रकार से ढका हुआ हो । बंधा हुआ पवित्र जल, त्रिदण्ड, गोलाकार आसन, शिखा यज्ञोपवीत

काषायमेव कार्पासं वासः कन्थां च धारयेत् ।
वल्कलं वाऽजिनं वापि कौशं शणमयं तु वा ॥
शिक्यं सकवचं पात्रं त्रिविष्टब्धेन संयुतम् ।
बद्धं जलपवित्रेण त्रिदण्डं वर्तुलासनम् ॥
शिखां यज्ञोपवीतं च शौचार्थमपि कुण्डिकाम् ।
सर्वदा धारयेद् गच्छन्नासीनो वापि वा शुचिः। विष्णुस्मृतौच-
उपवीतं त्रिदण्डं च पात्रं जलपवित्रकम् ।
कौपीनं कटिवस्त्रं च न त्याज्यं यावदायुषम् ॥

एवमादिभिर्धर्मशास्त्रवचोभिः संन्यासिभिः त्रिदण्डादीनां धारणं परमावश्यकम् । यतिधर्मत्वात् प्रथमं यज्ञोपवीतलक्षणमभिधाय, त्रिदण्ड लक्षणमभिधीयते । विषयेऽस्मिन् दत्तात्रेयात्री आहतुः ।

तन्तुत्रयमधोवृत्तं पुनश्चोर्ध्वं त्रिवृत्तवत् ।
कार्पासं तान्तवं कार्यं तथैकं चोत्तरीयकम् ॥

तथा शौच के लिये पुण्डि को सदैव धारण करे। कहीं आवागमन करता हुआ अथवा पीठ–मठ–आश्रम में स्थित किसी भी स्थिति में हो पवित्र रहकर इन साधनों को धारण करें। और विष्णुस्मृति में कहा है यज्ञोपवीत त्रिदण्ड और जल से पवित्र पात्र कौपीन और कटिवस्त्र को जब तक जीवन रहे तब तक कभी भी त्यागना नहीं चाहिये। इत्यादि धर्मशास्त्रीय वचनों से यह सिद्ध होता है कि संन्यासियों के द्वारा त्रिदण्ड आदि का धारण किया जाना परम आवश्यक है। संन्यासियों का धार्मिक कर्तव्य होने के कारण पहले यज्ञोपवीत का लक्षण कहकर त्रिदण्ड लक्षण कहा जाता है। इस विषय में दत्तात्रेय एवं अत्रि कहते हैं कि यज्ञोपवीत निर्माण में नीचे की ओर बँटा हुआ तीन सूत्र हो पुनः त्रिसूत्रि को तीनवार मोडकर ऊपर की ओर बँटा हुआ हो। इस तरह कपास निर्मित सूत का यज्ञोपवीत बनाया जाना चाहिये तथा एक उत्तरीय हो अधोवर्तित तीन सूत्रों से तिवाडा ऊपर की ओर बँटा हुआ कपास सूत से बना हुआ, नौ तन्तुओं वाला बाह्य ब्रह्मसूत्र कहा जाता है। नौ सूत्रों का संग्रह ब्राह्मणों के लिये मोक्षका साधन है। विना यज्ञोपवीत से तत्काल सभी धर्मों से बहिष्कृत हो जाता है।

इन धर्मशास्त्रों में दण्डलक्षण के प्रसंग में महर्षि कपिल के द्वारा कहा गया

अधोवृत्तैस्त्रिभिस्सूत्रैः त्रिभिरुर्ध्वं त्रिवृत्कृतम् ।
ब्रह्मसूत्रं स्मृतं ब्राह्मं कार्पासं नवतान्तवम् ॥
संग्रहो नवसूत्रस्य द्विजानां मुक्तिसाधनम् ।
विना तेन भवेत् सद्यः सर्वधर्मबहिष्कृतः ॥

तत्र दण्डलक्षणप्रकरणे कपिलेनोक्तम्-

अङ्गुलिप्रमाणमृजुमूर्ध्वायतं वैणवं दण्डं दण्डान् वा धारयेत् आत्मसम्मितं वा । अङ्कुरा यत्र दृश्यन्ते शुभाः पत्रविनिः सृताः । तत्र पर्वं विजानीयात् शेषं मध्यमिहोच्यते ॥ त्रिपञ्चसप्तनवकं पर्वचैकादशं तथा ॥ वर्जितो दण्ड इत्याहुर्यतेः सर्वत्र तस्य च । दत्तात्रेयस्तु-त्रिदण्डानङ्गुलिस्थूलान् वैणवानूर्ध्वसम्मितान् । सत्वचानव्रणान् सौम्यान् समसन्नतपर्वकान् । षडष्टदशपर्वाणो योनिहीनांश्च निर्व्रणान् ॥ दक्षस्तु-केशमात्रान् समग्रन्थीन् त्रिदण्डान् वैणवान् यतिः धारयेत् । इति आह । हारीतमते तु त्रिदण्डं पञ्चधाविभज्य तस्य त्रिभागादूर्ध्वं कृष्णगोबालरज्वा चतुरङ्गुलं वेष्टयेत् । ग्रन्थिधारात्रयेण सम्पन्नं जलेन पवित्रं विधाय गुरुणा प्रदत्तं त्रिदण्डं दक्षिण

है कि अंगुली प्रमाण से मोटाई वाला, ऊपर की ओर विस्तृत बाँस का बना हुआ दण्ड अथवा दण्डों को धारण करें । जो दण्डधारण करनेवाला व्यक्ति की लम्बाई से सन्तुलित हो जिस बाँस में अंकुर दिखाई देता है तथा मङ्गलकारी पत्र विशेष रूपसे निकला हुआ है उसे दण्ड में पर्व (गाँठ) समझना चाहिये । शेषभाग को इस शास्त्र में मध्यभाग कहा जाता है । तीन, पाँच, सात, नौ तथा ग्यारह पर्व वाला दण्ड निषिद्ध है ऐसा कहा गया है जो उस संन्यासी के लिये सर्वत्र वर्जित है ।

दत्तात्रेय के सिद्धान्त में तो कहा गया है कि अंगुली के बराबर मोटाई वाला बाँस से बना हुआ अपनी ऊँचाई से मापा गया छिलका के सहित छिद्र आदि दोष से रहित समान एवं झुका हुआ गाँठ वाला छः, आठ अथवा दश गाँठ वाला व्रण से रहित अच्छी जाति का दण्ड को धारण करे । दक्षस्मृतिकार तो कहते हैं कि दण्डधारक के शरीर के केश पर्यन्त लम्बाई वाला सम संख्या की गाँठ से युक्त बाँस से बना हुआ तीन दण्डों को संन्यासी धारण करें । हारीतस्मृति के सिद्धान्त में तो कहा गया है कि त्रिदण्ड की लम्बाई को पाँच भागों में विभाजित कर उसके तीन हिस्सा से

हस्तेन धारयेत् । वृद्धदक्षमतेन त्रिदण्डस्य मूले मध्ये अन्ते च सूत्रेणैव वेष्टयेत् संन्यासी त्रिदण्डं पञ्चधाविभक्तं पुनः विधाय, तस्याग्रभागे ब्रह्माणं, द्वितीयेपुरुषात्मानं तृतीयेविश्वात्मानं चतुर्थे निवृत्तिपुरुषं पञ्चमे च भागे सर्वात्मानं ध्यायेत् । समग्रं त्रिदण्डं सर्वेश्वरं श्रीरामरूपं विचिन्तयेत् तदुक्तं हारीतेन-विष्णुरूपं त्रिदण्डाख्यं सर्वथा धारयेद् यतिः । तं च स्वयमेव धारयेत् तदुक्तम्-ब्रह्मसूत्रं त्रिदण्डञ्च शिववद् बिभृयात् स्वयम् । बाह्येदितरेणाथ प्रायश्चित्तीभवेद् यतिः । पुरुषसूक्तेन विष्णुसूक्तेन वा अभिषेचयेत् । आव श्यके नित्यकर्मसम्पादनकाले उपदण्डेन बन्धयेत् । पूर्ववचने दण्डं दण्डान् वा धारयेदित्युक्तम् । किन्तु एकदण्डापेक्षया त्रिदण्डधारणमेव परमश्रेयस्करं सम्प्रदायाभिमतञ्च । विषयेऽस्मिन् भगवान् व्यास आह-

ऊपर कृष्णगोबाल की डोरी से चार अंगुल पर्यन्त लपेट दें । गाँठ की तीन धाराओं से युक्तकर जल द्वारा पवित्र करके आचार्य द्वारा दिया गया त्रिदण्ड को दाहिना हाथ से धारण करें । वृद्ध दक्षस्मृति के सिद्धान्तानुसार तो त्रिदण्ड के मूलभाग, मध्यभाग, तथा अन्तभाग में सूत के द्वारा ही परिवेष्टन करे । पाँच भागों में त्रिदण्ड को संन्यासी व्यक्ति विभाजित करके पुनः उस त्रिदण्ड के अग्रभाग में ब्रह्मा को द्वितीय भाग में पुरुषात्मा को, तृतीय भाग में विश्वात्मा को चतुर्थ भाग में निवृत्ति पुरुष को और पाँचवाँ भाग में सर्वात्मा को चिन्तन करे । अर्थात् पाँच भागों में क्रमशः इन देवताओं का ध्यान करे । तथा समग्र त्रिदण्ड को सर्वेश्वर श्रीरामचन्द्रजी के रूपमें विशेष रूपसे चिन्तन करे । यही बात हारीतस्मृतिकार के द्वारा कही गयी है । त्रिदण्ड नामसे प्रसिद्ध विष्णु स्वरूप को सर्वतोभावेन विरक्त संन्यासी हर प्रकार से हर परिस्थिति में धारण करे । और उस त्रिदण्ड को स्वयं ही धारण करे यही वात प्रामाणिक विद्वानों द्वारा कही गयी है । यज्ञोपवीत, एवं त्रिदण्ड शिखा के समान संन्यासी धारण करे । यदि संन्यासी दूसरे के द्वारा बहन करावें तो संन्यासी प्रायश्चित्ती होता है ।

पुरुषसूक्त के द्वारा अथवा विष्णु सूक्त के द्वारा अर्थात् इन सूक्तों में से किसी एक सूक्त को पढकर त्रिदण्ड का अभिषेक करे । आवश्यक स्नान भोजन आदि नित्यकर्म सम्पादन करने के समय में त्रिदण्ड को उपदण्ड के द्वारा बाँध दे । पूर्व निर्दिष्ट आचार्यों के वचन में कहा गया है कि दण्ड अथवा दण्डों को धारण करे ।

त्रिदण्डधारणं शस्तं तथैकान्तनिषेवणम् ।
लब्ध्वाहारमनायासो यतीनां मुक्तिसाधनम् ॥

कथञ्चित् प्रमादवशात् दण्डेषु नष्टेषु यावद्दण्डानामुपलब्धिर्नभवति तावत् पालाशमेकदण्डं कुशस्तम्बं वा धारयित्वा यतिः विचरेत् । पुनः लब्धे दण्डत्रये यथापूर्वं संस्कृत्य त्रिदण्डं धारयेत् ॥१३॥

ψ श्रीबोधायनस्मृतिमनुसृत्य त्रिदण्डविषयकः सिद्धान्तः प्रस्तूयते ψ

त्रीन्दण्डानङ्गुलिस्थूलान् वैणवान् मूर्धसम्मितान् ।
एकादशनवद्वित्रिचतुः सप्तान्यपर्वकान् ॥
वेष्टितान् कृष्णगोवालरज्वातु चतुरङ्गुलान् ।
गोवालरहितं चान्यद्धारयेदुपदण्डकम् ॥ हारीतस्तु-

किन्तु एक दण्ड की अपेक्षा त्रिदण्ड धारण करना ही परम कल्याणकारी है तथा सम्प्रदाय परम्परा से सम्मत है । एक दण्ड धारण करें या त्रिदण्ड धारण करें इस विषय में भगवान् कृष्णद्वैपायन वेदव्यासजी कहते हैं कि त्रिदण्ड का धारण करना अतिशय प्रशंसनीय है एवं एकान्त स्थान का पूर्ण रूप से सेवन करना हल्का भोजन करना, अधिक शारीरिक श्रम न करना यह सव संन्यासियों के लिये मुक्ति प्राप्त करने का साधन है यदि कथञ्चित् अनवधानता आदि के कारण त्रिदण्डों के नष्ट हो जाने पर तो जब तक त्रिदण्ड की उपलब्धि नहीं हो जाती है अर्थात् संस्कार पूर्वक तीनों दण्ड प्राप्त नहीं करलेते हैं तवतक पलाश का बना हुआ एक दण्ड को अथवा दर्भमुष्टि को धारण करके संन्यासी विचरण करे । पुनः तीनों दण्ड को उपलब्ध करलेने के पश्चात् पूर्व दण्ड धारण के अनुरूप संस्कार करके त्रिदण्ड को धारण करे ॥१३॥

बोधायन स्मृति का अनुसरण कर त्रिदण्ड धारण विषयक सिद्धान्त प्रकृत में प्रस्तुत करते हैं-

अंगुली की मोटाई के समान मोटाई वाला बाँस का बना हुआ, मस्तक पर्यन्त मापा ऊँचाई वाला तीन दण्ड रखें । जिनमें ग्यारह, नौ, दो तीन चार और सात गाँठ नहीं हों, अर्थात् इन से भिन्न ग्रन्थिवाले हों । और काली गाय के बालों की डोरी से चार अङ्गुल पर्यन्त वेष्टन हो तथा उन तीन दण्डों के साथ गोवाल के वेष्टन से रहित दूसरा एक उपदण्ड नामक दण्ड को भी धारण करे । और हारीतस्मृति में कहा गया

त्रिदण्डं वैणवं सम्यक् सन्ततं समपर्वकम् ।
वेष्टितं कृष्णगोवालरज्जुमच्चतुरङ्गुलम् ॥

भविष्यपुराणे च निरूपितं यथा-

दण्डं तु वैणवं रम्यं सत्वचं समपर्वकम् ।
पुण्यस्थाने समुत्पन्नं नानाकल्माषशोभितम् ॥
अदग्धमहतं कीटैः पर्वग्रन्थिविराजितम् ।
स्वयं भूतं तु मेदिन्यां शाखावर्जमृजुं शुभम् ॥
नाशादघ्नं शिखातुल्यं भ्रुवोर्वाविभृयाद् यतिः ॥

अत्रिस्मृतौ च त्रिदण्डनिर्माणविषयेन्यरूपयत्-

धारयेद् वैणवं दण्डं न स्थूलं न कृशं तथा ।
तस्य चाग्रे च मूले च ग्रन्थीं त्यक्त्वा तु धारयेत् ॥
द्विचत्वारिषडष्टौ वा ह्याङ्गुलानि समाहितः ।
न न्यूनं नातिरिक्तञ्च द्विगुणं मूलतोऽग्रके ॥

है कि चार अङ्गुल के भाग को काली गाय के बालों की रस्सी से परिवेष्टन किया गया हो जिसमें समसंख्यक गाँठ वाला बाँस का बना हुआ दण्ड हो उसे धारण करें। तथा भविष्यपुराण में भी दण्ड के विषय में प्रतिपादन किया गया है वह जैसे कि सुन्दर त्वचा वाला समसंख्यक पोर (ग्रन्थि) वाला बाँस का बना हुआ दण्ड होता है जो पुण्यजनक पवित्र स्थान में उत्पन्न हो तथा जिसे कीट आदि कोई जन्तु दूषित नहीं किया हो जलने आदि से जो दूषित नहीं हो समसंख्यक गाँठ से सुशोभित हो तथा जमीन पर स्वयं ही उत्पन्न हुआ हो शाखाओं से रहित सीधा नाक पर्यन्त लम्बाई वाला अथवा शिखा या भ्रुव पर्यन्त लम्बाई वाला दण्ड को श्रीवैष्णव संन्यासी धारण करें। और अत्रिस्मृति में त्रिदण्ड निर्माण के विषय में निरूपण किया गया है कि जिस दण्ड का मूलभाग से अग्रभाग (अन्तिम छोर) की गाँठ का भाग दुगुणा हो न्यून अथवा अधिक ग्रन्थि वाला नहीं हो दो, चार, आठ, छः अङ्गुल का अन्तर हो आदि तथा अन्त में गाँठ नहीं हो अधिक मोटा या अधिक पतला न हो ऐसा बाँस के बना हुआ दण्डको श्रीवैष्णव संन्यासी धारण करें कनिष्ठिका अङ्गुली के समान मोटाई उत्तम है तर्जनी के सदृश मध्यम है तथा अङ्गुष्ठ के सदृश अधम है। इसप्रकार परम पवित्र

इत्थं परमपवित्रस्थानसमुद्भूतान् दोषरहितान् त्रीन्वेणुदण्डान् अनाय्य केशान्तं, भ्रुवोः पर्यन्तं, नाशापर्यन्तं वा प्रत्येकदण्डं विनिर्माय, त्वचः क्षतिर्यथानस्यात् तथा सुसंस्कृत्य, गङ्गाजलेन तीर्थान्तरजलेन वा प्रक्षालयित्वा, अलावुवेणुकाष्ठादिविरचितान् पात्रांश्चकारयित्वा तांश्च स्वसम्प्रदायपरम्परा मनुसृत्य संन्यासाश्रमोचितानि साधनानि संकल्पय्य, दण्डकमण्डलुभिक्षापात्र शिक्यादीनि पवित्रस्थाने संस्थाप्य । स्वगुरुपरम्परानुसारेण क्षौरादिकं कर्मसमाप्य, सम्पादितनित्यकृत्यः परमविरक्तः मुमुक्षुः आत्मशुद्धिकामः एकं तप्तकृच्छ्रव्रतं कृत्वा, अनाश्रमीचतुरः प्राजापत्यं कृच्छ्रं परिसमाप्य-स्वसम्प्रदायानुरोधेनान्यद् व्रतं वा सम्पादयित्वा दण्डादि धारणात्पूर्वमधिकार सिद्धये, दैवादिकान् अष्टौ श्राद्धानि सम्पादयेत् । तप्तकृच्छ्रप्रजापत्ययोः स्वरूपं यथा स्मृतावुक्तम्-

स्थान में स्वयं पैदा हुये दोषों से शून्य तीन बाँस के दण्डों को मँगवाकर केश पर्यन्त, भ्रुव पर्यन्त, या नासिका पर्यन्त लम्बाई वाला प्रत्येक दण्ड को व्यवस्थित रूपसे बनाकर जिससे उसकी त्वचा आदि दूषित न हो । इसप्रकार अच्छी तरह शास्त्रीय विधान के अनुसार सुसंस्कृत कर गङ्गाजल से अथवा अन्य किसी तीर्थ के जल से प्रक्षालित करके अलाबू, बाँस काष्ठ आदि से बने हुये पात्रों को भी बनवाकर और उन सभी को अपनी आचार्य परम्परा के सम्प्रदाय का अनुसरण करके संन्यासाश्रम के उपयुक्त साधनों को संकलित कर दण्ड कमण्डलु भिक्षापात्र शिक्य आदि को पवित्र स्थान पर विधिवत् रखकर अपनी गुरु परम्परानुसार क्षौर आदि कर्मकलाप सम्पन्न कर स्नानादि नित्यकृत्य पूर्ण करके परम विरक्त मुमुक्षु साधक अपने आपको शुद्ध करने की इच्छा से एक तप्त कृच्छ्र व्रत करके अनाश्रमी व्यक्ति तो चार प्रजापत्य कृच्छ्र व्रत परिपूर्णकर अथवा अपने सम्प्रदाय के अनुसार अन्य कोई व्रत सम्पादित करके दण्ड आदि धारण के पहले अधिकार सिद्धि के लिये दैवादि आठ प्रकार के श्राद्धों को सम्पन्न करावें ।

तप्त कृच्छ्र और प्राजापत्य व्रतों का स्वरूप जैसे कि धर्मशास्त्र में बताया गया है वह यह है कि-तीन दिन तक गर्म जल पीवें तत्पश्चात् तीन दिन तक गर्म दूध पीवें एवं तीन दिन तक गर्म घृत पीये तथा तीन दिन तक हवा पीकर रहे ऐसा वारह दिन

त्र्यहमुष्णं पिबेद्वारि त्र्यहमुष्णं पयः पिवेत् ।
त्र्यहमुष्णं पिवेत् सर्पिः वायुभक्षोदिनत्रयम् ॥
पट्पलं तु पिवेदम्भस्त्रिपलं तु पयः पिवेत् ।
पलमेकं पिवेत् सर्पिः तप्तकृच्छ्रं विधीतते ॥
त्र्यहं प्रातः त्र्यहं सायं त्र्यहं भुङ्क्तेत्वयाचितम् ।
त्र्यहं पर च नाश्नीयात् प्राजापत्योविधिः स्मृतः ॥
सायं तु द्वादशग्रासाः प्रातः पञ्चदशस्मृताः ।
अयाचितैश्चतुर्विंशं परैस्त्वनशनं स्मृतम् ॥
कुक्कुटाण्डप्रमाणं स्याद् यावद् वास्यविशेन्मुखे ।
एतद् ग्रासं विजानीयाच्छुध्यर्थं कायशोधनम् ॥

में सम्पन्न होनेवाला तप्तकृच्छ्र व्रत होता है इसतरह पराशरस्मृति में प्रतिपादन किया गया है। जिस दिन जलपान करे उसकी मात्रा छः पल है। दूध पीने की मात्रा तीन पल है एवं घृतपान की मात्रा एक पल है तथा शेष तीन दिन में केवल निर्जल रहना है। तथा प्राजापत्य कच्छ्र में तीन दिन तक प्रातःकाल में भोजन करता है तथा तीन दिन सायं कालमें भोजन करता है एवं तीन दिन तक विना मांगे हुये जो मिलजाये उसे भोजन करता है एवं शेष तीन दिन में कुछ भी भोजन नहीं करता है ऐसा प्राजापत्य व्रत की विधि अत्रिस्मृति में कहा गया है। जिन दिनों में सायंकाल भोजन करेगा उन दिनों में बारह-बारह ग्रास (कर) भोजन होगा। प्रातःकाल के भोजन में पन्द्रह-पन्द्रह ग्रास (कर) भोजन करें। अयाचित भोजन में २४ ग्रास भोजन करें शेष तीन दिनों में कुछ भी भोजन नहीं करें यह बारह दिनों का प्राजापत्य व्रत होता है। ग्रास का प्रमाण कुक्कुट के अण्डा के बरावर होना चाहिये अथवा जितना सरलता पूर्वक मुख में प्रवेश कर सके इसी को ग्रास समझना चाहिये यह व्रत देहको पवित्र करनेवाला व्रत होता है।

प्राजापत्य व्रत के सम्पादन करने में यदि सामर्थ्य का अभाव हो तो उसके बदले गोदान करे। गाय के अभाव में गाय के मूल्य के वरावर द्रव्य दान करें उसके अभाव में बीसमासा सुवर्णदान करे अथवा चालीस मासा सुवर्ण दान करें जैसा कि पराशरस्मृति में इन सवकी समानता बतायी गयी है। अथवा कृच्छ्र व्रत में दश हजार

प्राजापत्यव्रताचरणासामर्थ्ये गां दद्यात् । धेनोरभावे तन्मूल्यं द्रव्यं दद्यात् । तदभावे चत्वारिंशन्माषमितं सुवर्णं दद्यात् । तदभावे विंशतिः माषाणां दद्यात् पराशरस्मृतावेतेषां साम्यदर्शनात् । तद्यथा-

कृच्छ्रोऽयुतं तु गायत्र्या उपवासस्तथैव च ।

धेनुप्रदानं विप्राय सममेतच्चतुष्टयम् ॥

ततोऽष्टौ श्राद्धानि निर्वपेत् ॥१४॥

अष्टश्राद्धविवेकः

अष्टसु श्राद्धेषु दैव, आर्ष, दिव्य, मानुष, भूत, पितृ, मातृ, आत्म, श्राद्धानि शास्त्रेषु प्रथितानि सन्ति । सर्वेषु मन्त्रेषु नान्दीमुख इति विशेषणं प्रयुज्यते । तद्यथा-उक्तम्-

गायत्री जप करे या उपवास करे दोनों समान है प्राजापत्य में गोदान ब्राह्मण के लिये करे। अथवा उसके मूल्य प्रदान करें। ये चारों ही समान कहा गया है तत्पश्चात् आठ प्रकार के दैव आदि श्राद्धों का सम्पादन करें ॥१४॥

आठ प्रकार के श्राद्ध होते हैं। उन आठ श्राद्धों में दैव श्राद्ध, आर्ष श्राद्ध, दिव्यश्राद्ध, मानुष श्राद्ध, भूत श्राद्ध, पितृ श्राद्ध, मातृ श्राद्ध, और आत्म श्राद्ध नामों से शास्त्रों में प्रसिद्ध हैं। सभी मन्त्रों में नान्दीमुख यह विशेषण प्रयोग किया जाता है। वह जैसे कहा गया है कि धर, ध्रुव, सोम, अहः, अनिल, अनल, प्रत्यूष प्रभास ये आठ वसु कहे गये हैं तथा मृगव्याध, सर्प, निगर्हति, अजैकपाद, अहिबुध्न्य, पिनाकी, दहन, ईश्वर, कपाली, स्थाणु, और भग ये ग्यारह रुद्र कहे गये हैं। इसीप्रकार बारह, सूर्य, धाता, मित्र, अर्यमा, शक्र, वरुण, अंश, भग, विवस्वान्, पूषा, सविता, त्वष्टा और वामन हैं ये सभी दैव श्राद्ध में देवता हैं। मरीचि, अत्रि, अङ्गिरा, पुलस्त्य, पुलह, क्रतु, प्रचेता, वशिष्ठ, भृगु, नारद, ये सभी ऋषि श्राद्ध के देवता कहे गये हैं। हिरण्य गर्भ और वैराजपति ये दोनों दिव्य श्राद्ध के देवता कहे गये हैं। सनक, सनन्दन, सनातन कपिल, आसुर, बोढु तथा पञ्चशिख ये सात मनुष्य श्राद्ध के देवता कहे गये हैं। पृथ्वी, जल, तेज वायु, आकाश, ये पाँच भूत श्राद्ध के देवता कहे गये हैं। कव्यवाह, अनल, सोम, अर्यमा, अग्निष्वाता, वर्हिषद और सोमपा ये सव पितृ श्राद्ध के देवता कहे गये हैं। लक्ष्मी, पद्मा, शची, मेधा, सावित्री, विजया, जया,

वसधोऽष्टौस्मृतास्तत्र रुद्रा एकादशापि वा ।
तथैव द्वादशादित्या दैव श्राद्धेषु देवताः ॥
मरीच्यत्र्यङ्गिरसो पुलस्त्यः पुलहः क्रतुः ।
प्रचेताश्च वशिष्ठश्च आर्षे च भृगु नारदौ ॥
दिव्ये हिरण्यगर्भश्च वैराजपतिरेव च ।
सनकश्च सनन्दश्च तृतीयश्च सनातनः ॥
कपिलश्चासुरश्चैव वोढः पञ्चशिखस्तथा ।
एते मानूषके श्राद्धे मनुष्याः सप्तदेवताः ॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
एतानि पञ्चभूतानि भूतश्राद्धे तु देवताः ॥
पितृश्राद्धे कव्यवाहनलः सोमौऽर्यमा तथा ।
अग्निष्वाता वर्हिषदः सोमपाश्चैव देवताः ॥
लक्ष्मीपद्मा शचीमेधा सावित्रीविजयाजया ।
देवसेना स्वधा स्वाहा मातृ श्राद्धेषु देवताः ॥
आत्मश्राद्धे देवता तु परमात्मा प्रकीर्तितः ।
एकैकोमन्त्रवित्पिण्डो देयस्तूष्णीमथा परः ॥
सर्वमन्त्रेषु कर्त्तव्यं नान्दीमुखविशेषणम् ।
क्षन्तव्यमिति तान्ब्रूयात्प्रणम्य शिरसा ततः ॥

देवसेना, स्वधा, स्वाहा ये सोलह मातृ श्राद्ध में देवता हैं। आत्मा श्राद्ध में तो परमात्मा देवता कहे गये हैं। इसमें एक-एक पिण्ड मन्त्र ज्ञानी पण्डित मौन रहकर प्रदान कर तथा सभी मन्त्रों में नान्दीमुख यह विशेषण जोडे। तत्पश्चात् क्षमा करे यह कहकर प्रणाम करके श्राद्ध क्रिया को सम्पन्न करें।

तदनुसार मोक्ष की कामना रखनेवाला पुरुष स्नान सन्ध्या आदि नित्यकृत्य को सम्पन्न करके अधोवस्त्र एवं उत्तरीय श्वेत वर्ण का धारण कर पवित्र होकर ॐ रामायनमः ॐरामचन्द्राय नमः, ॐरामभद्राय नमः इन मन्त्रओं से आचमन कर ॐरघु नन्दनाय नमः वोलकर हाथ धोवे पूर्वाभिमुख वैठकर रक्षा दीप को संस्थापित करके जलके सहित त्रिकुशा से स्वयं को एवं श्राद्धीय वस्तुओं को अभिषिक्त करें। तत्पश्चात्

विहितस्नानादिनित्यकृत्यः मुमुक्षुः धारितशुक्लद्विवासाःशुचिःआचम्य प्राङ्मुखःउपविश्यरक्षादीपं संस्थाप्य कुशत्रयजलेन आत्मानंश्राद्धवस्तूनि च प्रोक्षेत्

ॐअपवित्रः पवित्रो वा सर्वावस्थां गतोऽपिवा ।
यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥

ततः यवपुष्पैः ॐश्राद्धभूम्यै नमः इति मन्त्रेण भूमिं त्रिं सम्पूज्य कुशत्रययवजलान्यादाय सङ्कल्पं कुर्यात्-

ओमद्य अमुकमासे अमुकपक्षे अमुकतिथौ अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते चन्द्रे शेषेषु ग्रहेषु यथायथं राशि स्थानस्थितेषु सत्सु धरध्रुवसोमाहोऽनिलानलप्रत्यूषप्रभाससंज्ञानामष्टवसूनां मृगव्याधसर्प नैर्ऋत्या जैकपादाहिर्बुध्न्यपिनाकिदहनेश्वरकपालिस्थाणुमगाद्यानामेकादश रुद्राणाम्, धातृमित्र अर्यमाशक्रवरुणांशभगविवस्वतपूषासवितृत्वष्ट्रावामनाभिधानां द्वादशादित्यानाञ्च देवानां नान्दीमुखानां द्वितीयवर्गीयाणां मरीच्यत्रि अङ्गिरा पुलस्त्य पुलहष्क्रतु प्रचेतो वशिष्ठ भृगुनारदानां ऋषीणां नान्दीमुखानां तृतीयवर्गीययोः हिरण्यगर्भवैराजपत्योः नान्दीमुख्योः, चतुर्थवर्गीयाणां सनकसनन्दनसनातनकपिलासुरिवोढुपञ्चशिखानां मानुषाणां नान्दीमुखानां, पञ्चमवर्गीयाणां पृथिव्यप्तेजोवाय्वाकाशानां भूतानां नान्दीमुखानां, षष्ठवर्गीयाणां कव्यवाडनलसोमार्यमाग्निष्वात्तवर्हित्सोमपानां पितृणां नान्दीमुखानां, सप्तमवर्गीयाणां लक्ष्मीपद्माशचीमेधा सावित्री विजयाजया देवसेना स्वधा स्वाहानां मातृणां नान्दीमुखानाम् अष्टमवर्गीयस्य परमात्मन आत्मनः नान्दीमुखस्य भगवदाज्ञया भगवत्कैंकर्यरूपश्रीवैष्णवसंन्यास ग्रहण कर्मनिमित्तकमष्टवर्गीय श्राद्धमहं करिष्ये ॥१५॥

उसमें ॐअपवित्रः पवित्रो वा. यह मन्त्र पढे। तत्पश्चात् यव एवं पुष्प के साथ ॐश्राद्ध भूम्यै नमः इस मन्त्र से तीनवार भूमि का पूजन करके त्रिकुशा यव एवं जल लेकर संकल्प करें। ओमद्य. आदि मन्त्रों को श्राद्धमहं करिष्ये पर्यन्त संकल्प में उच्चारण करें। तत्पश्चात् तीनवार श्रीराम गायत्री ''ॐदाशरथाय विद्महे सीतावल्लभाय धीमहि तन्नो रामः प्रचोदयात्'' इस मन्त्र का एवं ॐदेवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमोनमः ॥ इस मन्त्र का तीनवार जप करें ॥१५॥

卐 कुशत्रययवजलान्यादाय→

(१) ॐश्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धीयानामष्टवर्गाणां नान्दीमुखानां श्राद्धसम्बन्धिनः सत्यवसुसंज्ञकाः विश्वेदेवाः इदमासनं वो नमः । इतिमन्त्रेण विश्वेभ्यो देवेभ्यः उत्तराग्रमासनं दद्यात् । अन्येभ्यस्तु पूर्वाग्रान् कुशान् आसनरूपेण वक्ष्यमाणमन्त्रैः दद्यात् (२) ओमद्य प्रथमवर्गीयाणाम् अष्टवस्वेकादशरुद्रद्वादशादित्यानां देवानां नान्दीमुखानां इदमासनं वो नमः । (३) ॐअद्य द्वितीयवर्गीयाणां मरीच्यादिदश ऋषीणां नान्दीमुखानां इदमासनं वो नमः । (४) ओमद्य तृतीयवर्गीययोः हिरण्यगर्भादिदिव्ययोः नान्दीमुखयोः इदमासनं वो नमः ।(५) ओमद्य चतुर्थवर्गीयाणां सनकादि सप्तमनुष्याणां नान्दीमुखानां इदमामनं वो नमः । (६) ओमद्य पञ्चमवर्गीयाणां पृथिव्यादिपञ्चभूतानां नान्दीमुखानां इदमासनं वो नमः ।(७) ओमद्य षष्ठवर्गीयाणां कव्यवाडादिपितृणां नान्दीमुखानां इदमासनं वो नमः ।(८) ओमद्य सप्तमवर्गीयाणां लक्ष्म्यादिमातृणां नान्दीमुखानाम् इदमासनं वो नमः । (९) ओमद्य अष्टवर्गीयस्य परमात्मन आत्मनः नान्दीमुखस्य इदमासनं ते नमः ।

卐 ततः वक्ष्यमाणैः मन्त्रैः श्राद्धीयान् देवान् आवाहयेत्→

(१) ॐ विश्वान्देवानहमावाहयिष्ये । इत्युच्चार्य ॐ विश्वेदेवा सऽआ

संन्यास ग्रहण करनेवाला मुमुक्षु पुरुष दैव आदि आठ प्रकार के श्राद्धों को प्रारम्भ करने के पूर्व इन उपकरणों को सावधानी से एकत्रित करालेवें । १-विशुद्ध बालुका से एक इंच ऊँची, एवं एक एक फुट का चतुष्कोण दश वेदी बनावें । जिन दो पूर्व में आठ उससे लगा हुआ पश्चिम में पलास पत्र का १० पुटक-पुटक के दो भाग में पत्रका मोड मूल की ओर हो जो तिनका से गूंथा हो गन्ध पुष्प धूपदीप फलादि नैवेद्य, नीवार चूर्ण, यवचूर्ण तण्डुल (चावल) दही घी खीर यव तिल पुष्प कच्चा धागा, जल से भरा हुआ घडा लोटा पञ्चपात्र अर्घा, आचमनी, मूल सहित तीन पत्रवाला दर्भ की मुष्टि, १० त्रिकुशा, दो मोटक, १० वस्त्र पिष्टि, संकेतित वस्तुओं का दश पिण्ड भात, गङ्गाजल १० भोजन योग्य पत्ता तथा अन्य संकेतित श्राद्धोपकरण एकत्रित करने के पश्चात् श्राद्ध आरम्भ करें ।

गत श्रृणुतामऽइमꣳहवम् । इदम्बर्हिर्न्निषीदत । इत्याबाह्य, ॐ"यवोसि यवयास्मद्वेषो यवयारातीः" इति विश्वेदेवपात्रे यवान् विकिरेत्। ततः प्रार्थचेत्-ॐ"विश्वेदेवा श्रृणुतेमꣳहवम्मेयेऽअन्तरिक्षे यऽउपद्य विविष्ट्व । येऽअग्निजिह्वाऽउतवाययत्राऽआसद्यास्मिन् बर्हिषि मादयद्ध्वम् ।"

आगच्छन्तु महाभागाविश्वेदेवा महाबलाः ।
ये चात्र विहिताः श्राद्धे सावधाना भवन्तु ते ॥

ततः ओम् "नान्दीमुखान्देवादीनहमावाहयिष्ये ।" इत्यावाह्य "ॐ यवोऽसि यवयास्मद्वेषो यवयारातीः इति पठित्वा देवान्नपात्रेषु यवान् विक्षिपेत् ।" अन्येषां कृते तु-

ॐ"आयन्तुनः पितरः सोम्यासोऽग्निष्वाताः पथिभिर्देवयानैः । अस्मिन् यज्ञे स्वधयामयदन्तोधि व्रुवन्तु ते वन्त्वस्मान्" । इति पठित्वा पितृपात्रे तिलान् प्रक्षिपेत् ।

ततः सर्वेषु अर्धपात्रेषु "ॐपवित्रेस्थो वैष्णव्यो सवितुर्वहः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम्" । इति मन्त्रेण पवित्राणि स्थापयित्वा ॐ दाशरथाय विद्महे सीतावल्लभाय धीमहि तन्नो रामः प्रचोदयात् इति श्रीरामगायत्र्या ॐ शन्नोदेवीरभीष्टये आपो भवन्तु पीतये । शन्नोरभिस्त्रवन्तुनः" इति मन्त्रेण च पुटकेषु जलं क्षिपेत् । ॐ यवोसि इति मन्त्रेण पुटकेषु यवान् क्षिपेत् । ततः

पूर्वाभिमुख वैठाकर त्रिकुशा जव एवं जल दाहिना हाथ में लेकर उन-उन सङ्कल्पों को पढकर विश्वेदेव से प्रारम्भकर परमात्मा पर्यन्त देवताओं को जो-दैव आदि आठ श्राद्धों के देवता हैं, उन्हें मन्त्रों के अनुसार एक एक दर्भ का आसन प्रदान करें। श्राद्धीय त्याग में यह ध्यान रखना चाहिये कि-ब्रह्मा आदि देवताओं को ब्रह्म तीर्थ से ऋषियों को ऋषि तीर्थ अन्य देवताओं को देव तीर्थ से तथा पितरों को पितृ तीर्थ से त्याग करें ।

दैव आदि अष्टवर्गीय देवताओं को आसन प्रदान करने के पश्चात् विश्वेदेव से लेकर परमात्मा पर्यन्त आठ तत्तद्वर्गीय देवताओं को निर्दिष्ट मन्त्रों के द्वारा आवाहन करें । तथा उन उन देवताओं के भोजन पात्र में मन्त्र पढकर उनके भोजन पात्रों में

प्रतिपुटकेतूष्णीं गन्धपुष्पे क्षिपेत् । तत्पश्चात् प्रथमम्पुटकं देवार्घपात्रं वामहस्ते संस्थाप्य तत्र स्थितं पवित्रं विश्वेदेवभोजनपात्रे निधाय वक्ष्यमाणमन्त्रं पठित्वा जलान्तरं दत्वा पवित्रोपरि किंञ्चिज्जलं दद्यात् । ॐ''या दिव्याऽआपः पयसासम्बभूवुर्याऽआन्तरिक्षाऽउत्पार्थिवीर्याः । हिरण्यवर्णा यज्ञियास्तान् आपःऽशिवाः शꣳस्योना सुहवा भवन्तु ।''

पुनः कुशत्रययवजलान्यादाय-

ओमद्याष्टश्राद्धीयानामष्टवर्गीयाणां नान्दीमुखानां श्राद्धसम्बन्धिनः सत्यवसुसंज्ञकाः विस्वेदेवाः एषवो हस्तार्घो नमः । इति पवित्रोपरि अर्घजलं दद्यात् । पूर्वोक्तमेवमन्त्रं पठित्वा सर्वेषु देवादीनां भोजनपात्रेषु प्रतिपात्रम्पवित्रं निधाय प्रतिपुटके किञ्चिदुदकान्तरं दत्वा ॐ या दिव्या आपः० इति मन्त्रेण कुशत्रययवजलान्यादाय-

ओमद्य प्रथमवर्गीयाणामष्टवस्वेकादशरुद्रद्वादशादित्यानां देवानां नान्दीमुखानां एष वो हस्तार्घे नमः । ओमद्य द्वितीयवर्गीयाणां मरीच्यादि दशऋषीणां नान्दीमुखानां एष वो हस्तार्घो नमः । ओमद्य तृतीयवर्गीययोः हिरण्यगर्भादिदिव्ययोः नान्दीमुखयोः एष वो हस्तार्घो नमः । ओमद्य चतुर्थवर्गीयाणां सनकादिसप्तमनुष्याणां नान्दीमुखानां एष वो हस्तार्घो नमः ।

यव विखेरे। एवं पितृ पात्र में तिल विखेरे। तत्पश्चात् दश अर्घ पात्रों में ''पवित्रेस्थो'' इस मन्त्र के द्वारा दर्भ के अग्रभाग के पत्रों से पवित्री-बनाकर पुटकों में पवित्री स्थापित करें। तत्पश्चात् श्रीरामगायत्री एवं 'शन्नो देवी...' इस मन्त्र को पढकर प्रत्येक पुटक में जल भरे। इसके वाद यवोऽसि...इस मन्त्र से प्रत्येक पुटक में यव स्थापित करें। एवं प्रत्येक पुटक में गन्ध पुष्प मौन रहकर ही डालें। इसके वाद प्रथम पुटक को उठाकर बायाँ हाथ में व्यवस्थित रखकर उसमें विद्यमान पवित्री को विश्वेदेव के भोजन पात्र में स्थापितकर आगे कहा जाने वाला मन्त्र पढकर दूसरा जल भी उस पुटक में पुनः डालकर पवित्री के ऊपर कुछ जल प्रदान करें। एवं पुटक को पूर्ववत् स्थापित कर दें। पुनः त्रिकुशा यव एवं जल दाहिना हाथ में लेकर पूर्वक्रम से ही या दिव्या आपः...इस मन्त्र से सभी को अर्घ प्रदान में पढकर क्रमशः प्रत्येक पुटक को बायाँ हाथ में रखकर पवित्री दैव आदि श्राद्धीय देवताओं के भोजनपात्र में निकाल

ओमद्य पञ्चमवर्गीयाणां पृथिव्यादिपञ्चभूतानां नान्दीमुखानां एष वो हस्तार्घो नमः । ओमद्य षष्ठवर्गीयाणां कव्यादिपितृणां नान्दीमुखानां एष वो हस्तार्घो नमः । ओमद्य सप्तमवर्गीयाणां लक्ष्म्यादिमातृणां नान्दीमुखानां एष वो हस्तार्घो नमः । ओमद्य अष्टमवर्गीयस्य परमात्मन आत्मनः नान्दीमुखस्य एष ते हस्तार्घो नमः ।

ततोऽवशिष्टजलपवित्रयुतं प्रथमं देवार्घपात्रमादाय "ॐविश्वेभ्यः देवेभ्यः स्थानमसि" इति देवासनदक्षिणभागे उत्तानमेवार्घपात्रं स्थापयेत् । एवं सर्वत्र अवशिष्टजलपवित्रयुतं पात्रमादाय-

ॐअष्टश्राद्धीयदेवेभ्यः स्थानमसि । उत्तानमेवार्धपात्रं स्यापयेत् ।

ततः गन्धादिकं दद्यात्-गन्धादिकं दत्वा संकल्पं कुर्यात्-

ओमद्य श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धीयानामष्टवर्गाणां नान्दीमुखानां श्राद्धसम्बन्धिनः सत्यवसुसंज्ञकाः विश्वेदेवाः एतानि गन्धपुष्प धूपदीपताम्बूलयज्ञोपवीतवासांसि वो नमः । ओमद्य श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धीयाष्टवर्गीयाणां देवर्षिदिव्यपितृमातृकमानुषभौतिकात्मानां नान्दीमुखानायेतानि गन्धादीनि वो नमः ।

अन्नपरिवेषणम्-

ततः विश्वेदेवस्थाने अष्टसु स्थानेषु च जलेन चतुष्कोणमण्डलं कुर्यात्-

यथा बाणायुधो रामः त्रैलोक्यम्परिरक्षति ।
एवं मण्डलतोयन्तु सर्वभूतानि रक्षतु ॥

कर रख दें । पुटक में थोडा दूसरा जल डालकर क्रमशः दैव से लेकर आत्म पर्यन्त श्राद्धीय देवताओं के पात्र में अर्घ प्रदान करें एवं कुछ अवशिष्ट जल सहित पुटक को यथापूर्व रख दें । प्रत्येक अर्घ प्रदान में अलग-अलग त्रिकुश यव एवं जल लेना चाहिये तथा उसमें से पवित्री निकालकर देवान्नपात्र में रखकर पुटक में जलान्तर प्रदान करना एवं अर्घ देना अपेक्षित है । अवशिष्ट जल से युक्त तथा पवित्री से युक्त देवार्घ पात्र को "ॐ विश्वेभ्यः देवेभ्यः स्थानमसि" यह कहकर देवासन के दक्षिण भाग में उत्तान ही रखना चाहिये एवं अन्य अष्टश्राद्धीय देवताओं के लिये भी "अष्टश्राद्धीय देवेभ्यः स्थानमसि" उत्तान ही अर्घपात्रों को उन देवताओं के आसन के समक्ष रखें।

ततः सर्वस्मात् पिण्डद्रव्यात् किञ्चित्-किञ्चित् निःसार्य सजले पुटकादौ हस्तेनैव सघृतमन्नमादाय पुटकस्थद्वयजले ॐ अग्नये कव्यवाहनाय स्वाहा ॐ सोमाय पितृमते स्वाहा आहुतिद्वयं जुहुयात् ।

ततः अपसव्येन दक्षिणाभिमुखः पातितवामजानुः मोटकतिल जलान्यादाय किञ्चिदन्नासं गृहीत्वा ॐ इदमन्नमेतद् भूस्वामी पितृभ्यो नमः" इति भूस्वामी पितृभ्यः दद्यात् ।

ततः सव्यं कृत्वा प्राङ्मुखः आचम्य सर्वत्र नवसु स्थानेषु परिवेषणं तत्र अष्टवस्वाद्यारभ्य अष्टसु स्थानेषु फलम् नीवारस्य दध्योदनम्, यवचूर्णम् दध्योदनम्, दध्योदनम्, क्षीरम्, क्षीरम्, किलाटः (मावा) यथाक्रमेण श्रीरामगायत्र्या परिवेषणं कुर्यात् । घृतं जलञ्च तत्रोपनीय-ॐ मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः माध्वीर्नः सन्तोषधीः । मधुनक्तमुतोषसो मधुमत्पार्थिव७ रजः । मधुद्यौरस्तुनः पिता । मधुमान्नो वनस्पतिर्मधुमाँ २ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । ॐ मधु मधु मधु इति ऋक्त्रयं श्रावयित्वा भोजनपात्रं स्पृशेत् ।

तद्यथा-उत्तानपाणिभ्याम्-

ॐ"पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि स्वाहा । ॐ इदं विष्णुर्व्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा७सुरे स्वाहा । ॐ कृष्णहव्यमिदं रक्षमदीयम्" ॥ इति पठित्वा अंगुष्ठनिवेसनम्- "ॐ इदमन्नम्" इत्यन्ने । "ॐ इमा आपः" इति जले । ॐ इदमाज्यमिति घृते । ॐ इदं हविः इति पुनरन्ने । ॐ यवोसि यवयास्मद्द्वेषो यवयारातीः" इति यवान्निक्षिप्य ।

एवं मौन रहकर ही गन्धपुष्प आदि अर्पित करें । तत्पश्चात् पुनः संकल्प करें । हाथ में पूर्ववत् त्रिकुशा यव एवं जल लेकर उन-उन देवताओं के उद्देश्य से विश्वेदेव से लेकर आत्म पर्यन्त देवताओं को संकल्प पूर्वक गन्धपुष्प एवं वस्त्रों का उत्सर्ग (दान) करें।

पुनः उन विश्वेदेव से लेकर परमात्मा पर्यन्त देवताओं के पात्र में अन्न परोशने

यवजलान्यादाय ओमद्य श्रीवैष्णवसंन्यासग्रहणाङ्गष्टश्राद्धीयाष्टवर्गीयाणां देवर्षिदिव्यपितृमातृकमानुषभौतिकात्मनां नान्दीमुखानां इदमन्नं सोपकरणं वो नमः ।

ततः बद्धकरसम्पुटः-ओम् अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु । इति जपेत् । ततः श्रीरामगायत्रीं त्रिर्जपित्वा । ॐ मधु मधु मधु इति । ॐ मधुवाता...अन्यानि पुरुषसूक्तादीनि जपेत् जापयेद्वा । विकरदानम् ततः कुशानास्तीर्य जलेन प्रोक्ष्य सयवधृतमन्नमादाय-
ॐअग्निदग्धाश्च ये जीवा येऽप्रदग्धाः कुले मम ।
भूमौ दत्तेनतृण्यन्तु तृप्ता यान्तु परांगतिम् ॥

इति मन्त्रेण कुशोपरि विकिरदानं कुर्यात् । ततः आचम्य हरिं स्मृत्वा श्रीरामगायत्रीं त्रिर्जपेत् । ततः उत्तरोत्तरक्रमेण प्रादेशमात्राणि अष्टौ स्थण्डिलानि पिण्डार्थं कृत्वा सर्वत्र प्रागग्रां रेखां दर्भमूलेन-

ॐ अपहता असुरा रक्षाᳫसि वेदिसदः, इति मन्त्रेण कुर्यात् । ततः रेखायाः उपरिप्रत्येकम्-

ॐ ये रूपाणि प्रतिमुञ्चमानाऽअसुराः सन्तः स्वधयाचरन्ति । परापुरोनिपुरो ये भरन्त्यग्निष्टांल्लोकात्प्रणुदात्यस्मात् ॥

इतिमन्त्रेण अंगारां भ्रामयेत् । ततः रेखोपरि प्रत्येकं कुशत्रयमास्तीर्य श्रीरामगायत्रीं त्रिर्जपित्वा, अष्टौ अवनेजनपात्राणि जलयवगन्धपुष्पयुतानि स्थापयेत् । ततः प्रतिवेद्यां सावशेषमवनेजनं कुशोपरिदद्यात् ।
के पहले सभी वेदी को जल से चतुष्कोण मण्डल बनाकर घेर दें । तथा प्रार्थना करे कि जिसप्रकार धनुर्बाण आयुध धारी भगवान् श्रीरामजी तीनों लोकों का सभी तरह से संरक्षण करते हैं उसी प्रकार यह मण्डल का जल प्राणी मात्र की रक्षा करे । तत्पश्चात् सभी पिण्ड द्रव्यों से थोडा-थोडा निकालकर जल सहित दशवाँ पुटक में हाथ से ही घी सहित अन्न को लेकर दो पुटकों के जल में "ओम् अग्नये कव्यवाहनाय स्वाहा एवं सोमाय पितृमते स्वाहा" इन मन्त्रों को पढकर दो आहुति प्रदान करें । ये तीनों ही पुटक पूर्ववर्णित पुटकों से अतिरिक्त होंगे । तत्पश्चात् अपसव्य होकर (दाहिना कन्धा

(१) ओमद्य प्रथमवर्गीयाः अष्टवस्वेकादशरुद्रद्वादशादित्या देवता नान्दीमुखाः श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डस्थाने अत्रावने निग्ध्वं वो नमः ।

(२) ओमद्य द्वितीयवर्गीयाः मरीच्यादिदशर्षयः नान्दीमुखाः संन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डस्थाने अत्रावने निग्ध्वं वो नमः ।

(३) ओमद्य तृतीयवर्गीयौ हिरण्यगर्भादिदिव्यनान्दीमुखयोः श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डस्थाने अत्रावने निक्ष्वेथां वां नमः ।

(४) ओमद्य चतुर्थवर्गीयाः सनकादिसप्तमनुष्याः नान्दीमुखाः श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डस्थाने अत्रावने निग्ध्वं वो नमः ।

(५) ओमद्य पञ्चमवर्गीयाः पृथिव्यादयः पञ्चभूताः नान्दीमुखाः श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डस्थाने अत्रावने निग्ध्वं वो नमः ।

(६) ओमद्य षष्ठवर्गीयाः कव्यवाडादयः पितरः नान्दीमुखाः श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डस्थाने अत्रावने निग्ध्वं वो नमः ।

(७) ओमद्य सप्तमवर्गीयाः लक्ष्म्यादयः मातरः नान्दीमुख्यः श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डस्थाने अत्रावने निग्ध्वं वो नमः ।

(८) ओमद्य अष्टमवर्गीयः परमात्मन्नात्मनः नान्दीमुखः श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डस्थाने अत्रावनें निक्ष्व ते नमः ।

पर एवं वायाँ बाहु के नीचे जनेऊ होता है उसको अपसव्य कहते हैं) दक्षिण दिशा की ओर मुँह करके बायाँ जाँघ गिराकर मोटक तिल एवं जल लेकर थोडासा अन्न का हिस्सा उठाकर इदमन्नमेतद्...मन्त्र पढकर भू-स्वामी के पितरों को अन्न प्रदान करें।

मूल सहित तीन दर्भ को लेकर दो का मूल एकतरफ एक का मूल दूसरे तरफ करके तीनों दर्भों को बराबर रखकर ढाइवार ऐंठकर एकके मूल से सभी मुडे हुये कुशों को ढाइवार लपेटकर बान्धते हैं उसे मोटक कहा जाता है।

तत्पश्चात् पुनः सव्य होकर (अर्थात् बायाँ कन्धा पर एवं दाहिना बाहु के नीचे यज्ञोपवीत को करके) पूर्वाभिमुख होकर आचमन करके सभी नौ भोजन पात्रों में भोजन परोसकर उनमें आठ वसुओं से लेकर परमात्मा पर्यन्त आठों पात्रों में प्रथम

पिण्डदानम्-ततः प्रथमवेदिकायां कदलीफलेन देवेभ्यः पिण्डदानम्। तद्यथा-हस्ते जलयवत्रिकुशांश्च गृहीत्वा-

ओमद्य प्रथमवर्गीयाः अष्टवस्वेकादशरुद्रद्वादशादित्या देवता नान्दीमुखाः श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धे एष वः पिण्डो नमः। द्वितीय पिण्डं तूष्णीमेव तत्पूर्वतो दद्यात्।

ततः द्वितीयवेदिकायां दधिमिश्रितनीबारेण ऋषिभ्यः-

ओमद्य द्वितीयवर्गीयाः मरीच्यादिदशर्षयः नान्दीमुखाः श्रीवैष्णव संन्यासग्रहणाङ्गाष्टश्राद्धे एष वः पिण्डो नमः। द्वितीयपिण्डं तूष्णीमेव तत्पूर्वतो दद्यात्।

ततः तृतीयवेदिकायां यवपिष्टेन दिव्याभ्याम्-

ओमद्य तृतीयवर्गीयौ हिरण्यगर्भादिदिव्ययोः नान्दीमुखयोः श्रीवैष्णव संन्यासग्रहणाङ्गाष्टश्राद्धे एष वां पिण्डो नमः। द्वितीयपिण्डं तूष्णीमेव तत्पूर्वतो दद्यात्।

ततः चतुर्थवेदिकायाः मनुष्येभ्यः दध्योदनाभ्याम्। ओमद्य चतुर्थ वर्गीयाः सनकादिसप्तमनुष्याः नान्दीमुखाः श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धे एष वः पिण्डो नमः। द्वितीयपिण्डं तूष्णीमेव तत्पूर्वतो दद्यात्।

ततः पञ्चमवेदिकायां भूतेभ्यः दधिमिश्रिततण्डुलेन ओमद्य पञ्चमव र्गीयाः पृथिव्यादयः पञ्चभूताः नान्दीमुखाः श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धे एष वः पिण्डो नमः। द्वितीयपिण्डं तूष्णीमेव तत्पूर्वतो दद्यात्।

ततः षष्टवेदिकायां पितृभ्यः हविषा-

में फल, द्वितीय में निवार, तृतीय में दही भात, चतुर्थ में जौ का आटा, पाँचवाँ में दही भात, छठा में दही भात, सातवाँ एवं आठवाँ में दूध भात एवं नौवाँ में मावा यह विश्वेदेव से लेकर परमात्मा पर्यन्त पात्रों में प्रतिपात्र में श्रीरामगायत्री पढकर परोसे। सभी पात्रों में घृत एवं जल रखकर ओम् मधुव्वाता...इस मन्त्र को पढकर प्रत्येक भोजन पात्र का स्पर्श करें। पुनः एक-एक पात्र में दोनों ही उत्तान हाथों को लगाकर "ओम् पृथिवी ते पात्रम्"...आदि पढकर ओम् कृष्णकव्यमिदं रक्षमदीयम् तक उच्चारण करके बायाँ हाथ उत्तान की अवस्था में पूर्ववत् रखे हुये दाहिना हाथ की

ओमद्य षष्ठवर्गीयाः कव्यवाडादयः पितरो नान्दीमुखाः श्रीवैष्णव संन्यासग्रहणाङ्गाष्टश्राद्धे एष वः पिण्डो नमः। द्वितीयं पिण्डं तूष्णीमेव दद्यात् ।

ततः सप्तमवेदिकायां मातृभ्यः हविषा-

ओमद्य सप्तमवर्गीयाः लक्ष्म्यादयः मातरो नान्दीमुख्यः श्रीवैष्णव संन्यासग्रहणाङ्गाष्टश्राद्धे एष वः पिण्डो नमः। द्वितीयपिण्डं तूष्णीमेव तत्पूर्वतो दद्यात् ।

ततः अष्टमवेदिकायां आत्मनः दुग्धपिण्डेन-

ओमद्य अष्टमवर्गीयः परमात्मन्नात्मनः नान्दीमुखः श्रीवैष्णवसंन्यास ग्रहणाङ्गाष्टश्राद्धे एष ते पिण्डो नमः । ततः द्वितीयपिण्डं तूष्णीमेव तत्पूर्वतो दद्यात् ।

ततः दर्भमूले करं प्रोक्ष्य आचम्य श्रीरामगायत्रीं त्रिर्जपित्वा-

ॐ अत्रपितरो मादयध्वं यथाभाग मा वृषायध्वं, इति उत्तराभिमुखो श्वासं नियमयन् तेन पथा यथा पूर्वं मुखं परिवर्तयन् "ॐ अमीमदन्तपितरो यथा भागमावृषायिष्ट । इति पठन् श्वासं विसृतेत् ।

ततः अवनेजनावशिष्टजलेन प्रत्यवनेजनं दद्यात् ।

ओमद्य प्रथमवर्गीया अष्टवसवैकादशरुद्रद्वादशोदित्यदेवता नान्दी मुखाः श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डोपरिप्रत्यवने निग्ध्वं वो नमः।

अंगूठा को अन्न में लगाकर "ओम् इदमन्नम्" यह उच्चारण करे। तत्पश्चात् जल में लगाकर "ओम् इमा आपः" एवं घृत में "इदमाज्यम्" तथा इदं हविः कहकर पुनः अन्न में दाहिना अंगूठा से स्पर्श करे तथा अन्न के ऊपर ओम् यवोसि...यह पढकर जौ, अन्न पर विखेरे। यह व्यवहार प्रत्येक अन्नपात्र में इन्हीं मन्त्रों से तथा इसी क्रमसे करें।

पुनः यव एवं जल लेकर सभी पात्र का उत्सर्ग करे। तत्पश्चात् हाथ जोडकर ओम् अन्नहीनम्...आदि मन्त्र पढकर तीनवार श्रीरागायत्री जपकर ओम् मधु, मधु, मधु, मधुव्वाता० तथा पुरुषसूक्त का पाठकरे अथवा किसी दूसरे के द्वारा पाठ करावें। पुनः वेदियों के आस पास में दर्भ विखेर कर जलसे सिञ्चितकर जौ एवं घृत सहित अन्न लेकर ओम् अग्निदग्धां...आदि मन्त्र पढकर पूर्व में विखेरे हुये कुश के ऊपर अन्न को विखेरे।

ओमद्य द्वितीयवर्गीयाः मरीच्यादिदशर्षयः नान्दीमुखाः श्रीवैष्णव संन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डोपरि प्रत्यवने निग्ध्वं वो नमः ।

ओमद्य तृतीयवर्गीयौ हिरण्यगर्भादिदिव्यौ नान्दीमुखौ श्रीवैष्णव संन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डोपरि प्रत्यवने निजातं वां नमः ।

ओमद्य चतुर्थवर्गीयाः सनकादिसप्तमनुष्याः नान्दीमुखाः श्रीवैष्णव संन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डोपरि प्रत्यवने निग्ध्वं वो नमः ।

ओमद्य पञ्चमवर्गीयाः पृथिव्यादिपञ्चभूताः नान्दीमुखाः श्रीवैष्णव संन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डोपरि प्रत्यवने निग्ध्वं वो नमः ।

ओमद्य षष्ठवर्गीयाः कव्यवाडादिपितरो नान्दीमुखाः श्रीवैष्णवसंन्यास ग्रहणाङ्गाष्टश्राद्धे पिण्डोपरि प्रत्यवने निग्ध्वं वो नमः ।

ओमद्य सप्तमवर्गीयाः लक्ष्म्यादि मातरो नान्दीमुख्यः श्रीवैष्णवसंन्यास ग्रहणाङ्गाष्टश्राद्धे पिण्डोपरि प्रत्यवने निग्ध्वं वो नमः ।

ओमद्य अष्टमवर्गीयः परमात्मन्नात्मनः नान्दीमुखः श्रीवैष्णवसंन्यास ग्रहणाङ्गाष्टश्राद्धे पिण्डोपरि प्रत्यवने निक्ष्व ते नमः ।

तत्पश्चादाचम्य प्राणानायम्य श्रीरामगायत्रीं त्रिं जपित्वा श्राद्धीय देवादीन् प्रणम्य क्रमेण सर्वेभ्यः पिण्डेभ्यः सूत्रमादाय वेदिकायाः पिण्डोपरि सूत्रं दद्यात् वक्ष्यमाणं मन्त्रं पठन् सूत्रं दद्यात् ।

पुनः आचमन करके हरिस्मरण कर तीनवार श्रीराम गायत्री जपकरे । पुनः उत्तर-उत्तर क्रमसे एक-एक प्रादेश के आठ स्थण्डिल पिण्ड दान के लिये बनाकर सभी स्थण्डिलों पर पूर्व दिशा में जिसका अग्रभाग है अर्थात् पश्चिम से पूर्व दिशा की ओर दर्भमूल से रेखा खींचे । यह रेखा आठों स्थण्डिलों पर होना चाहिये । तथा रेखा खींचने में "अपहता असुरा रक्षाꣳसि वेदिषदः" इस मन्त्र से रेखा करें । तत्पश्चात् रेखा के ऊपर अंगार किसी साधन से पकडकर "ये रूपाणि प्रतिमुञ्चमानाः"...इस मन्त्र को पढकर प्रत्येक रेखा पर जलता हुआ अंगार घुमावें । आग का अंगार घुमाने के पश्चात् प्रत्येक रेखा पर तीन-तीन कुश विछाकर तीनवार श्रीरामगायत्री को जप करे। पुनः आठ पुटकों में अवनेजन हेतु जल, यव, गन्ध, पुष्प, स्थापित करके प्रत्येक वेदी के ऊपर पूर्व में दिया गया अर्घ से अवशिष्ट अवनेजन दर्भ के ऊपर प्रदान करें।

"ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वा गृहान्नः पितरो दत्तसतोवः पितरो देष्म ॥" एतद्वः पितरो वासाः । एतद्वो देवावासः । एतद्वो ऋषयोवासः । एतद्वां दिव्यौवासः । एतद्वो मनुष्यावासः । एतद्वो भूतावासः । एतद्वो पितरो वासः । एतद्वो मातरोवासः । एतत्ते आत्मन् वासः ।

ततः कुशत्रय यवजलान्यादाय-वक्ष्यमाणैः संकल्पवचनैः पिण्डेषुवासं उत्सृजेत्-

ओमद्य प्रथमवर्गीयाः अष्टवस्वेकादशरुद्रद्वादशादित्यदेवताः नान्दी मुखाः श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डयोः एतद्वोवासो नमः ।

ओमद्य द्वितीयवर्गीयाः मरीच्यादिदशर्षयः नान्दीमुखाः श्रीवैष्णव संन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डयोः एतद्वोवासो नमः ।

ओमद्य तृतीयवर्गीयौ हिरण्यगर्भादिदिव्यौ श्रीवैष्णवसंन्यासग्रहणा ङ्गाष्टश्राद्धे पिण्डयोः एतद्वांवासो नमः ।

ओमद्य चतुर्थवर्गीयाः सनकादिसप्तमनुष्याः नान्दीमुखाः श्रीवैष्णव संन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डयोः एतद्वोवासो नमः ।

ओमद्य पञ्चमवर्गीयाः पृथिव्यादिपञ्चभूता नान्दीमुखाः श्रीवैष्णव संन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डयोः एतद्वोवासो नमः ।

ओमद्य षष्ठवर्गीयाः कव्यवाडादिपितरो नान्दीमुखाः श्रीवैष्णवसंन्यास ग्रहणाङ्गाष्टश्राद्धे पिण्डयोः एतद्वोवासो नमः ।

ओमद्य सप्तमवर्गीयाः लक्ष्म्यादिमातरो नान्दीमुखाः श्रीवैष्णव संन्यासग्रहणाङ्गाष्टश्राद्धे पिण्डयोः एतद्वोवासो नमः ।

तथा अवनेजन दिये गये उन-उन संकल्प मन्त्रों को पढें । इसतरह एक से लेकर आठ स्थण्डिलों पर इसी क्रम से प्रयोग करें । प्रत्येक स्थण्डिल पर मन्त्र पढकर अवनेजन प्रदान करने के पश्चात् पिण्ड प्रदान करें ।

॥ पिण्डदान ॥

पहली वेदी पर कदली आदि किसी शुद्ध फल से देवताओं के लिये पिण्डदान

ओमद्य अष्टमवर्गीयः परमात्मन्नात्मनः नान्दीमुख्योः श्रीवैष्णव संन्यासग्रहणाङ्गष्टश्राद्धे पिण्डयोः एतद्वोवासो नमः ।

ततो गन्धपुष्पधूपवस्त्रताम्बूलादिभिः तूष्णीमेव पिण्डान् पूजयेत् । तत्पश्चा च्चटोपरि "ॐ शिवा आपः सन्तु" इति जलम्, ॐ सौमनस्यमस्तु इति पुष्पम्, ॐ अक्षताञ्चारिष्टिञ्चास्तु इति तण्डुलान् निक्षिप्य कुशत्रय यवजलान्यादाय-

ओमद्य श्रीवैष्णवसंन्यासग्रहणाङ्गष्टश्राद्धीयाष्टवर्गीयाः देवर्षिदिव्य पितृमातृकमानुषभौतिकात्मनः नान्दीमुखाः दत्तैतदन्नपानादिः प्रीयन्ताम् । ततः प्रतिवेदिपिण्डोपरि अक्षय्योदकं प्रदाय जलधारां दद्यात् । तत्र जलधारा प्रदाने वक्ष्यमाणाः मन्त्रा सन्ति ।

ॐ अघोराः देवाः सन्तु, ॐ अघोराः ऋषय सन्तु, ॐअघोरौ दिव्यौ स्याताम् । ॐ अघोराः मानुषा सन्तु, ॐ अघोराणि भूतानि सन्तु, ॐ अघोराः पितरः सन्तु, ॐ अघोराः मातरः सन्तु, ॐ अघोरः आत्मा अस्तु ।

ततो बद्धकरसम्पुटः सन् आशिषः प्रार्थयेत् । ॐ गोत्रन्नोवद्‌र्धतां, दातारो नोऽभिवद्‌र्धन्ताम् । वेदाः सन्ततिरेव च । श्रद्धा च नो माव्यगमद् बहुदेयं च नोऽस्तु । अन्नं च नो बहुभवेत् । अतिथींश्च लभेमहि । याचिता रश्च नः सन्तु मा च याचिष्म कञ्चन । एताः सत्याः आशिषः सन्तु ।

करें । तथा हाथ में जस यव एवं त्रिकुशा को लेकर ओमद्य प्रथमवर्गीयाः इत्यादि मन्त्र पढकर पिण्डदान करें । एवं दूसरा पिण्ड मौन रहकर ही दे । पुनः द्वितीय वेदिका में दही से मिश्रित नीवार से बनाहुआ ऋषियों को पिण्डदान करें । एवं ओमद्य द्वितीयवर्गीयाः...इत्यादि मन्त्र पढें । दूसरा पिण्ड मौन होकर ही दे । इसके वाद तीसरी वेदी पर पिसा हुआ यव से दिव्यों को ओमद्य तृतीयवर्गीयौ...इत्यादि मन्त्र पढकर पिण्डदान करें । तथा दूसरा पिण्ड मौन रहकर ही दें । चौथी वेदी पर मनुष्यों के लिये दहीभात के पिण्ड लेकर ओमद्य चतुर्थवर्गीयाः आदि मन्त्र पढकर पिण्डदान करें । एवं दूसारा पिण्ड मौन रहकर ही दें । तत्पश्चात् पञ्चम वेदी पर भूत के लिये दही मिला हुआ चावल के पिण्ड से ओमद्य पञ्चमवर्गीयाः... आदि मन्त्र पढकर पिण्ड प्रदान करें । एवं दूसरा पिण्ड मौन रहकर प्रदान करें । तत्पश्चात् छठी वेदी पर हविष्यान्न से

ततः प्रतिपिण्डं सपवित्रं कुशत्रयं दत्वादक्षिणाग्रां जलधारां दद्यात् । तत्रचायं मन्त्रः । ॐ ऊर्जं वहन्तीरमृतम् घृतम् पयः कीलालम् परिश्रुतम् स्वधास्य तर्पयत मे पितृन् । ततः किञ्चिन्नम्रीभूय पिण्डान् आघ्राय, उत्थाप्य पिण्डाधारकुशानुल्मुकञ्चाग्नौ क्षिप्त्वा, अर्घपात्राणि सञ्चाल्य, पुरोहिताय ब्राह्मणाय देयं दक्षिणा द्रव्यं दद्यात्-तत्र संकल्पः, ओमद्य श्रीवैष्णव संन्यासग्रहणाङ्गाष्टश्राद्धीयानामष्टवर्गीयाणां देवर्षिदिव्यमानुषभौतिकपितृ मातृकात्मनां नान्दीमुखानां विश्वेषां देवानां कृतैतत् श्राद्धकर्मप्रतिष्ठार्थं मनसोद्दिष्टां दक्षिणां यथा नामगोत्राय श्रीवैष्णवाय दातुमहमुत्सृजे ।

ओमद्य श्रीवैष्णवसंन्यासग्रहणाङ्गाष्टश्राद्धीयानामष्टवर्गीयाणां नान्दीमुखानां कृतैतत् श्राद्धकर्मप्रतिष्ठार्थं सम्भवस्थापितामिमां दक्षिणां यथानाम गोत्राय श्रीवैष्णवाय दातुमहमुत्सृजे ।

ततः सर्वान् स्वश्रेष्ठलोकान् सम्प्रदायानुसारेण प्रणम्य क्षमध्वमि त्युच्चार्य विसृज्य, दीपं निर्वाप्य आचम्य, श्रीरामगायत्रीं त्रिः जपित्वा वदेत् ।

प्रमादात् कुर्वतां कर्मप्रच्यवेताध्वरेषु यत् ।
स्मरणादेव दद्विष्णोः सम्पूर्णं स्यादितिश्रुतिः ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्योवन्दे तमच्युतम् ॥

पितरों को ओमद्य षष्ठवर्गीयाः आदि मन्त्र पढकर पिण्डदान करें । एवं दूसरा पिण्ड मौन रहकर दें । इसके वाद सप्तम वेदी पर मातृकाओं को हविष्यान्न से ओमद्य सप्तमवर्गीयाः आदि मन्त्र पढकर पिण्डदान करें । एवं मौन रहकर दूसरा पिण्ड उससे पूर्व दिशा में दें । तत्पश्चात् अष्टमवेदी के ऊपर आत्मदेवता के लिये खोवा का पिण्ड लेकर ओमद्य अष्टमवर्गीयाः आदि मन्त्र पढकर पिण्डदान करें एवं उससे पूर्व दिशा में मौन रहकर दूसरा पिण्ड दें । तत्पश्चात् दर्भ के जड में हाथ पोंछकर आचमन करके तीनवार श्रीरामगायत्री जपकर उत्तर दिशा की ओर मुँह घुमाता हुआ श्वास को नियंत्रित करता हुआ ओम् अत्र पितरोमाद्यध्वम् आदि मन्त्र को पढकर पुनः उसी क्रम से मुडता हुआ ओम् अमीमदन्त पितरः आदि मन्त्र को पढता हुआ श्वास छोडे । इसके वाद अवनेजन जलदान से बचाहुआ जलसे प्रत्येक पिण्ड पर उन-उन मन्त्रों से अवनेजन

ततः पूर्वोपकल्पितं त्रिदण्डं कुशासनोपकल्पितवेदिकायां संस्थाप्य शतकृत्वः मूलमन्त्रेण स्नापयित्वा षोडशोपचारेण पूजयेत् ।

ॐ सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात् ।

सभूमि७सर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ इति आवाहनम् नमस्कारं समर्पयामि ।

पुरुष एवेद७सर्वं यद्भूतं यच्चभाव्यम् ।

उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ इति आसनं दद्यात्-आसनं समर्पयामि ॥

एतावानस्य महिमातोज्यायांश्चपूरुषः ।

पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि ॥ इति पाद्यम्-पाद्यं समर्पयामि ।

त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः ।

ततो विष्वङ्व्यक्रामत् साशनानशने अभि ॥ इत्यर्घम्-अर्घ्यं समर्पयामि ॥

ततो विराडजायतविराजो अधिपुरुषः ।

स जातो अत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ इत्याचमनीयम्-आचमनीयं समर्पयामि ।

तस्माद् यज्ञात् सर्वहुतः सम्भृतम् पृषदाज्यम् ।

पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥ इति स्नानम्-स्नानीयं समर्पयामि ।

तस्माद् यज्ञात् सर्वहुतः ऋचः समानि जज्ञिरे ।

छन्दा७सि यज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ इति वस्त्रम्-वस्त्रं समर्पयामि ।

तस्मादश्वा अजायन्त ये केचोभयादतः ।

गावोह जज्ञिरे तस्मात्तस्माज्जाता अजावयः। इतियज्ञोपवीतम्-यज्ञोपवीतं समर्पयामि

प्रदान करें एवं आठों पिण्डों पर भिन्न-भिन्न मन्त्र पढकर अवनेजन देकर आचमन, प्राणायाम एवं तीनवार श्रीरामगायत्री जपकर श्राद्धीय दैव आदि आठों देवताओं को प्रणाम करके कच्चा सूत लेकर सभी पिण्डों के लिये वेदी पिण्डों के ऊपर सूत्रदान करें। वह सूत्रदान आगे पढा जानेवाला मन्त्रों को पढता हुआ ही करें। इस सूत्र दान क्रिया में "ओम् नमो वः पितरो रसाय" आदि मन्त्र पढकर विश्वेदेव से लेकर आत्म पर्यन्त नौ देवताओं के लिये वस्त्र के लिये मुडा हुआ कच्चा धागा प्रदान करें। इस क्रिया को सम्पन्न करने के पश्चात् त्रिकुशा यव एवं जल लेकर आगे कहे जानेवाले संकल्प वचनों से प्रत्येक पिण्डों पर प्रथमवर्गीयाः, द्वितीयवर्गीयाः आदि कहकर वस्त्र उत्सर्ग करें।

तं यज्ञं बर्हिषिमौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ इति गन्धम्-गन्धं समर्पयामि ।
यत् पुरुषं व्यदधुः कतिधाव्यकल्पयन् ।
मुखं किमस्यासीत् किम्बाहू किमूरू पादावुच्येते ॥ इति पुष्पम्-पुष्पंसमर्पयामि।
ब्राह्मणोऽस्यमुखमासीद्बाहूराजन्यकृतः ।
ऊरुतदस्य यद्वैस्याः पद्भ्याँशूदो अजायत ॥ इति धूपम्-धूपं समर्पयामि ।
चन्द्रमामनसोजातश्चक्षोः सूर्योऽजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ इति दीपम्-दीपं समर्पयामि ।
नाभ्या आसीदन्तरिक्षँशीर्ष्णो द्यौ समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकान्नकल्पयन् ॥ इति नैवेद्यम्-नैवेद्यं समर्पयामि
यत्पुरुषेण हविषा देवा यद्यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म ईध्मशरद्धविः ॥ इति मुखशुद्धिं-मुखशुद्धिं समर्पयामि
सप्तास्यासन् परिधयस्त्रिः सप्तसमिधः कृताः ।
देवा यद्यज्ञं तन्वाना अवध्नन् पुरुषं पशुम् ॥ इति प्रदक्षिणा-प्रदक्षिणां समर्पयामि
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
तेहनाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ इति न०-न० समर्पयामि
अत्र षोडशोपचारपूजने प्रतिमन्त्रे

तत्पश्चात् गन्ध पुष्प धूप वस्त्र ताम्बूल आदि मौन रहकर ही सभी पिण्डों पर देकर पिण्डों की पूजा करें। इसके वाद चट के ऊपर "ओम् शिवा आपः सन्तु" कहकर पुष्प, अक्षतं चारिष्टं चास्तु कहकर चावल त्रिकुशा यव एवं जल लेकर ओमद्य श्रीवैष्णवसंन्यास ग्रहण आदि मन्त्र पढकर प्रत्येक वेदी के पिण्ड के ऊपर अक्षय्योदक देकर जलधारा प्रदान करें। इस जलधारा प्रदान में आगे कहे जानेवाला "अघोरा देवास्सन्तु से लेकर अघोरः आत्मा अस्तु" पर्यन्त आठों वेदीयों पर जलधारा प्रदान करने का अलग-अलग मन्त्र निर्दिष्ट है।

पिण्डों पर जलधारा देने के पश्चात् दोनों हाथ जोड़कर सावधान होकर आशीर्वाद के लिये प्रार्थना करें कि हमारी गोत्र परम्परा सम्बर्धनशील हो हमारे कुल में दान देनेवालों की ज्ञानियों की एवं सन्तति की अभिवृद्धि हो हमारी श्रद्धा कभी

ॐ भूर्भुवः स्वः त्रिदण्डाधिदेवाय नमः इदं ध्यानं पुष्पं समर्पयामि-
इत्यादीनि प्रति उपचारं वदेत् ।

तत्पश्चाद् वक्ष्यमाणैः मन्त्रैः त्रिदण्डाधिदैवतं प्रार्थयेत् ।

अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधाविजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् हतस्थुर्भुवनानि विश्वा ॥

यो देवेभ्य आतपति यो देवानां पुरोहितः ।
पूर्वोयो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥

कम न हो हमें बहुत अधिक मात्रा में अन्न हो तथा समय-समय पर अतिथिगण उपलब्ध होते रहें । हमलोगों से याचना करनेवाले लोग हों तथा हम सव किसी से याचना नहीं करें । ये उपर्युक्त आशीर्वाद सत्य हों ।

तत्पश्चात् प्रत्येक पिण्ड पर पवित्री सहित त्रिकुशा रखकर दक्षिण दिशा की ओर जानेवाली जलधारा प्रदान करें । एवं जलधारा प्रदान करने में ऊर्ज्जं वहन्ति...इत्यादि मन्त्र को पढें । जलधारा प्रदान करने के पश्चात् थोडा झुककर पिण्डों को सूँघकर तथा क्रमशः पिण्डों को उठाकर पिण्ड के नीचे रखा हुआ दर्भ एवं पूर्व में रेखाओं के ऊपर घुमाये जानेवाले अंगार को आग में डालकर अर्घ पात्रों को थोडासा हिलाकर पुरोहित ब्राह्मण के लिये दातव्य दक्षिणा धन प्रदान करें तथा ओमद्य आदि दोनों दक्षिणा के संकल्प को पढकर उत्सर्ग करें । इस श्राद्ध क्रिया को सम्पन्न करने के पश्चात् अपने से श्रेष्ठ लोगों को अपनी सम्प्रदाय परम्परा के अनुसार दण्डवत् प्रणाम करके आप सव क्षमा करें यह कहकर उन्हें विसर्जन करके रक्षादीप को बुझाकर श्रीरामाय नमः आदि मन्त्रों से आचमन करके श्रीरामगायत्री को तीनवार जप करके अग्रिम मन्त्रों को पढें ।

कर्म करनेवाले पुरुषों के द्वारा असावधानी वश जो यज्ञों में किसी तरह की त्रुटि हो जाती है वह सव भगवान् विष्णु-सर्वेश्वर श्रीरामजी के स्मरण मात्र से ही

रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् ।

यस्त्वेवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे ॥

श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रेपार्श्वे नक्षत्राणिरूपमश्विनौ व्यात्तम् । इष्णन्निषाणमुम्म इषाण सर्वलोकम्म इषाण ॥ ॐभूर्भवः स्वः त्रिदण्डादि देवताभ्यो नमोनमः प्रार्थनां समर्पयामि ॥१६॥

इति श्रीआनन्दभाष्यसिंहासनासीन

जगद्गुरु श्रीरामानन्दाचार्यश्रीरामेश्वरानन्दाचार्यकृतौ श्रीवैष्णवसंन्यास मीमांसायां त्रिदण्डनिर्माण एवं पूजनविधिः सम्पन्नः

卐 श्रीरामः शरणं मम 卐

॥ अथ संन्यासविधिः ॥

卐 ॐ नमः परमात्मने श्रीब्रह्मणे पुराणपुरुषोत्तमाय श्रीरामाय 卐

अथ संन्यासाधिकारसिद्धये कृच्छ्रचतुष्टयं, तप्तकृच्छ्रमेकं प्राजापत्यं वा

सम्पूर्ण हो जाता है इसप्रकार का वेद वचन है। जिसके स्मरण और नामोच्चारण के द्वारा तपस्या यज्ञ क्रिया आदि में न्यूनता सम्पूर्णता को प्राप्त करती है उस अच्युत परब्रह्म सर्वेश्वर श्रीरामजी को मैं प्रणाम करता हूँ।

तत्पश्चात् पूर्वकाल में बनाये गये त्रिदण्ड कमण्डलु आदि में से त्रिदण्ड को लेकर व्यवस्थित रखकर १०० वार ब्रह्मतारक श्रीराम मन्त्र से त्रिदण्ड का स्नान कराकर पुरुषसूक्त के प्रत्येक मन्त्र पढकर षोडशोपचार से त्रिदण्ड का पूजन करें। निर्दिष्ट मन्त्रों के द्वारा त्रिदण्ड में अधिदेवता का आवाहन, आसनदान, पाद्य, अर्घ्य आदि षोडशोपचार से पूजन करके अद्भ्यः सम्भृतः आदि श्रीश्चते पर्यन्त छवों मन्त्रों से त्रिदण्ड के अधिदेवता भगवान् श्रीरामजी की स्तुति करें।

इसप्रकार श्रीआनन्दभाष्यसिंहासनासीन जगद्गुरु श्रीरामानन्दाचार्यश्रीरामेश्व रानन्दाचार्यजी की कृति श्रीवैष्णवसंन्यास मीमांसा में त्रिदण्ड निर्माण एवं पूजन विधि सम्पन्न हुआ ॥१६॥

श्रीवैष्णव संन्यास विधान

ॐनमः परमात्मने श्रीब्रह्मणे पुराणपुरुषोत्तमाय श्रीरामाय

इसके वाद संन्यास ग्रहण करने अधिकार सिद्धि के लिये चार कृच्छ्र व्रत या

व्रतं सम्प्रदायानुसारेणान्यद् वा व्रतं परिसमाप्य संन्यासयोग्यता भवति। तदाह कात्यायनः-कृच्छ्रचतुष्टयमनाश्रमिभिः कार्यम्, कृच्छ्रमेकमाश्रमिभिः। द्वादश्यां पौर्णमास्यां वा सङ्कल्प्यवपनं कृत्वा, देवश्राद्धम् प्रथमम्, ऋषिश्राद्धं द्वितीयं दिव्यश्राद्धं तृतीयं, पित्र्यं चतुर्थं, मातृकं पञ्चम्, मानुषं षष्ठं, भौतिकं सप्तमम्, आत्मनीनञ्चाष्टममिति। अत्र संन्यासिनां साधनविषये आह श्रीबोधायनाचार्य यष्टयः शिक्यं कमण्डलुं जलपवित्रं पात्रमित्येतानि।

श्रीवशिष्ठस्तुः-त्रिदण्डमासनं कन्थां शिक्यं पात्रं कमण्डलुम्।
षण्णां परिग्रहं कुर्यात् शेषं वित्तं त्यजेद्बुधः॥
द्रव्यत्यागं प्रकुर्वाणो मलशुद्धिविधीयते।
अत्यागे पुत्रवित्तानां संन्यासं नैव कारयेत्॥

कात्यायनमते तु-त्रिदण्डजलपवित्रशिक्यपात्रकौपीनकाषायवस्त्राण्यग्निसंन्निधौ संस्थाप्यानग्निमानग्निमुत्पादयेदिति। एवमादिधर्मशास्त्रकर्तृणां सिद्धान्तं विविच्याभिधीयते। संन्यासग्रहणात् पूर्वं देवतायतने ग्रामे ग्रामसीमान्ते नदीपुलिनेऽन्यस्मिन् वा पुण्यस्थाने विहितदैवादिश्राद्धक्रियो मुमुक्षुः परमविरक्तः श्रीवैष्णवसंन्यासग्रहणमहंकरोमीति सङ्कल्पं विधाय, षोडशोपचारैरन्योपचारैश्च श्रीहनुमन्तं सम्पूज्य-

यो वारांनिधिमल्पपल्वलमिवोल्लंघ्य प्रतापान्वितो
वैदेही घनतल्पशोकहरणो वैकुण्ठभक्तप्रियः।
अक्षाद्यूर्जितराक्षसेश्वरमहादर्पापहारी रणे
सोऽयं वानरपुङ्गवोऽवतु सदा चास्मान् समीरात्मजः॥

एक तप्तकृच्छ्र अथवा प्राजापत्य व्रत अपनी सम्प्रदाय परम्परा के अनुसार अन्य कोई व्रत को परिपूर्ण कर संन्यास ग्रहण करने की योग्यता होती है। इस विषय वस्तु को कात्यायन कहते हैं कि "विना आश्रम वाले मुमुक्षुओं के द्वारा चार कृच्छ्र व्रत किया जाना चाहिये। आश्रमवासी के द्वारा एक कृच्छ्र व्रत किया जाना चाहिये। द्वादशी अथवा पौर्णमासी को संकल्प करके क्षौरकर्म कराकर पहले देवश्राद्ध, द्वितीय ऋषिश्राद्ध, तृतीय दिव्यश्राद्ध, चतुर्थ पितृश्राद्ध, पाँचवाँ मातृश्राद्ध, छठा मनुष्य श्राद्ध, सातवाँ भौतिक श्राद्ध, एवं आठवाँ आत्महित के लिये श्राद्ध करके इस विषय में

ॐअन्वग्निरुषसामग्रमवख्यदन्वहानि प्रथमोजातवेदाः ।
अनुसूर्यस्य पुरुत्रा चशमीननुद्यावा पृथिवीऽआतर्तथ ॥

इतिमन्त्रेण ब्रह्मचारी लौकिकाग्नीं, विरक्तो ॐकारसहितेन श्रीराम मन्त्रेण अग्निमानीय ''ॐ पृष्टोदिवि पृष्टोऽअग्निं पृथिव्यां पृष्टो विश्वा ओषधीराविवेश । वैश्वानरः सह सापृष्टोऽअग्निं सनो दिवासरिषस्पातु नक्तम्'' इति मन्त्रेण वेद्यां अग्नीं संस्थाप्य तेनैव मन्त्रेण प्रज्वालयेत् । ॐ तत् सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात् । ॐ तां सवि तुर्वरेण्यस्य चित्तामाहं वृणेसुमतीं विश्वजन्याम्, यामस्य कायोऽअदुहत् प्रपीनां सहस्रधारा मासासामहीङ्गाम ॥ ॐविश्वानिदेव सवितुर्दुरितानि परासुव यद्भद्रं तन्न आसुव'' इति त्रिभिः मन्त्रैः तिस्रः समिधः अग्नौ संस्थाप्य । रक्षादीपं प्रज्वाल्य, पवित्रेस्थो इति मन्त्रेण पवित्रधारणं विधाय ।

ॐश्रीरामाय नमः ॐश्रीरामभद्राय नमः, ॐश्रीरामचन्द्राय नमः, इति मन्त्रैः त्रिराचम्य ॐराघवेन्द्राय इति हस्तप्रक्षालनं विधाय । ॐअपवित्रः पवित्रो वा...इति मन्त्रेण पूजाद्रव्याणि स्वात्मानं चाभिषिच्य । हस्ते पुष्पाण्यादाय-भद्रसूक्तं पठेत्-ॐआनोभद्राः क्रतवोयन्तु व्विश्वतो दब्ब्धासोऽअपरीतासऽउद्भिदः । देवानोयथा सदमिद्वृधेऽअसन्नप्रायुवो रक्षितारो दिवे दिवे ॥ देवानाम्भद्रासुमतिर्ऋजूयतान्देवानाꣳरातिरभिनो निवर्तताम् । देवानाꣳसक्ख्यमुपसेदिमाव्वयन्देवा नऽआयुः प्रतिरन्तुजीवसे ॥ तान्पूर्व्वंयानिविदाहूमहेव्वयम्भगम्मित्रमदितिन्दक्षमस्त्रिधम् । अर्य्यमणं व्वरुणꣳसोममश्विनासरस्वतीनः सुभगामयस्करत् ॥ तन्नोव्वातोमयोभुव्वातुभे

संन्यासियों के उपकरण के विषय में आचार्य श्रीबौधायनजी कहते हैं कि ''दण्ड, शिक्य, कमण्डलु, जल पवित्री एवं पात्र ये सव संन्यासी के साधन होते हैं'' । श्रीवशिष्ठजी तो कहते हैं कि त्रिदण्ड, आसन, कन्था, शिक्य, पात्र एवं कमण्डलु, इन छः वस्तुओं का संन्यासी परिग्रह करे । इससे अतिरिक्त सभी धनों को समझदार संन्यासी परित्याग कर दे । पुत्र एवं धन आदि का विना त्याग किये संन्यास ग्रहण नहीं करना चाहिये । कात्यायन के सिद्धान्तानुसार तो त्रिदण्ड, जल पवित्र, शिक्य, पात्र, कौपीन एवं काषाय वस्त्र को अग्नि के समीप में रखकर जो आहिताग्नि व्यक्ति नहीं

षजन्तन्मातापृथिवी तत्पिता द्यौः । तद्ग्रावाणः सोमसुतोमयोभुवस्त दश्विनाश्रृणुतन्धिष्ण्ययायुवम् ॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धि यञ्जिन्वमवसे हूमहेव्वयम् । पूषानो यथा व्वेद सामसद्वृधे रक्षितापायुरदब्धः स्वस्तये ॥ स्वस्तिनऽइन्द्रोव्वृद्धश्रवाः स्वस्तिनःपूषाव्विश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्द्दधातु ॥ पृषदश्वामरुतः पृश्निमातरः शुभँय्यावानो व्विदथेषु जग्मयः । अग्निजिह्वामनवः सूरचक्षसो व्विश्वेनोदेवाऽअवसागमन्निह । भद्रङ्कर्णेभिः शृणुयामदेवाः भद्रम्पश्येमाक्षभिर्य्यजत्राः । स्थिरैरङ्गै स्तुष्टुवाᳪसस्तनूभिर्व्व्यशेमहि देवहितंय्यदायुः । शतमिन्नुशरदोऽअन्तिदेवा यत्रानश्च्चक्राजरसन्तनूनाम् । पुत्रासोयत्रपितरो भवन्तिमानोमद्ध्यारीरिषतायुर्ग्गन्तोः ॥ अदितिर्द्यौर दितिरन्तरिक्षमदितिर्म्माता सपितासपुत्रः । व्विश्वेदेवाऽअदितिः पञ्चजनाऽअ दितिर्ज्जातमदितिर्ज्जनित्वम् ॥ द्यौः शान्तिरन्तरिक्षᳪशान्तिः पृथिवीशान्ति रापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिसर्व्वᳪशान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि । यतो यतः समीहसे ततो नोऽअभयं कुरु । शन्नः कुरुप्रजाब्भ्यो भयन्नः पशुब्भ्यः ॥ ॐशान्तिः शान्तिः शान्तिः ।

ततः सङ्कल्पं कुर्यात्-ओमद्य विष्णुर्विष्णुर्हरिर्हरिः-भगवतः परमात्मनः परब्रह्मणः पुराणपुरुषोत्तमस्य श्रीरामस्याज्ञया साकेताधिनाथस्य नित्य पार्षदत्वप्राप्तिकामनया श्रीवैष्णवसंन्यासग्रहणकर्मणि अर्घ्य पाद्य आचम नीय स्नान वस्त्रोपवस्त्र यज्ञोपवीतगन्धपुष्प धूपदीप नैवैद्य ऋतुफल ताम्बूल दक्षिणादिभिः श्रीहनुमत्पूजनमहं करिष्ये ।

है वह अग्नि स्थापन करे । इत्यादि धर्मशास्त्रकारों के सिद्धान्त का विवेचन कर संन्यास ग्रहण करने के विषय में कहा जाता है । संन्यास ग्रहण करने से पहले देव मन्दिर, गाँव, ग्राम सीमान्त, नदीतट, अथवा अन्य किसी पुण्यजनक पवित्र स्थान पर जिसने दैव आदि आठ श्राद्धों को सम्पन्न करलिया है ऐसा मुमुक्षु परम विरक्त व्यक्ति श्रीवैष्णव "संन्यास ग्रहण मैं कररहा हूँ" इसप्रकार संकल्प करके षोडशोपचार अथवा अन्य उपचार से श्रीहनुमानजी की सम्यक् पूजा करके-

ततः षोडशोपचारेण श्रीहनुमत्पूजनानन्तरं पुण्याहवाचनं कुर्यात् । प्राग ग्रान्दर्भान् धान्यराशौ संस्तीर्य, तेषु सूत्रवेष्टितकुम्भं निधाय, तस्मिन् शुद्धजलं ॐभूर्भुवः स्वरोम् इति व्याहृतिभिरापूर्यकलशाधारस्थलं संस्कुर्यात् । ॐमहीद्यौः पृथिवीचन इमं यज्ञमिमिक्षताम् । पितृतान्नोभरीमभिः ।

ततः धान्यपुञ्जं विकिरेत्-

ॐधान्यमसि धिनुहि देवान् प्राणायत्वोदानायत्वा व्यानायत्वा । दीर्घामनुप्रसीतिमायुषेधान्देवो वः सविताहिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषेत्वा महीनाम्पयोसि ।

ततः कलशं संस्थापयेत्-

ॐआजिघ्रकलशं मह्यात्वा विशन्त्विन्दवः । पुनरुर्जानिवर्त्तस्वसानः सहस्त्रं धुक्ष्वोरुधारा पयस्वतीपुनर्मा विशताद्रयिः ।

ततः जलं पूरयेत्-

ॐवरुणस्योत्तम्भनमसि वरुणस्यस्कम्भसर्जनीस्थो वरुणस्यऽऋत सदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद । ततः कलशे गन्धं प्रक्षिपेत्-ॐ त्वां गन्धर्वा अखनं स्त्वामिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत । ततः कलशे सर्वोषधी निदध्यात्-ॐ याऽओषधिः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा । मनैनुषभ्रुणामहꣳशतन्धा मानि सप्त च । ततः कलशे दूर्वाः निरध्यात्-ॐकाण्डात् काण्डात्प्ररोहन्ति पुरुषः परुषस्परि। एवानो दूर्वे प्रतनु सहस्त्रेण शतेन च । (एक विंशति कुशनिर्मितं कूर्चं कलशे प्रक्षिपेत्)

जो महान पराक्रम सम्पन्न बानर श्रेष्ठ पवनतनय समुद्र को छोटा जलाशय के समान लाँघकर जनकतनया श्रीसीताजी के महान् शोक शल्या को निवारण करनेवाले भगवान् श्रीरामजी के भक्तों का प्रिय अक्षय कुमार आदि महान् पराक्रमी के घातक राक्षसराज के युद्ध में उसके गर्व का अपहरण करनेवाले हैं वे ये श्रीहनुमानजी जो बानर श्रेष्ठ पवनतनय हैं वे हम सभी की रक्षा करें ।

तत्पश्चात् ॐअन्वग्नि...इस मन्त्र से ब्रह्मचारी एवं विरक्त पुरुष ओंकार सहित श्रीराममन्त्र से अग्नि का आवाहन कर ॐ पृष्टोदिवि...इस मन्त्र से वेदी के ऊपर

कूर्चाग्रराक्षसाङ्धाराञ् छिन्धि कर्मविघातिनः ।
त्वामर्पयामि कुम्भेऽस्मिन् साफल्यं कुरुकर्मणि ॥

ततः कलशे पञ्चपल्लवान् निदध्यात्-

वृक्षराजसमुद्भूता शाखायाः पल्लवन्त्वचः ।
युष्मान् कुम्भेष्वर्पयामि सर्वपापानुपत्तये ॥

ततः कलशे सप्तमृत्तिकाः निदध्यात्-

ॐस्योनापृथिवी नो भवानृक्षरानिवेशनि । यच्छानः शर्म स प्रथाः ॥

ततः कलशे पूलीफलं निदध्यात्-

याः फलनीर्याऽअफलाऽअपुष्पायाश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्तानो मुञ्चत्वꣳहसः ॥

ततः कलशे पञ्चरत्नानि निदध्यात्-

ॐपरिवाजपतिः कविरग्निर्हव्यान्यक्रमीत । दधद्रत्नानि दाशुषे ।

ततः कलशे हिरण्यं निदध्यात्-

ॐहिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।
सदाधारपृथिवीं द्यामुतेमा कस्मैदेवाय हविषा विधेम ॥

ततः वस्त्रेण कलशं वेष्टयेत्-

ॐसुजातो ज्योतिषा सहशर्मवरुथमासदत्स्वः ।
वासोऽअग्ने विश्वरूपꣳसम्व्ययस्व विभावसो ॥

ततः पूर्णपात्रस्थापनम्-

संस्थापित कर उसी मन्त्र से अग्नि को प्रज्वलित करें । "ॐतत्सवितुवरेण्यम् यहाँ से लेकर ॐविश्वानिदेव सवितः" पर्यन्त तीनों मन्त्रों से तीन काष्ठों को संस्थापित कर, रक्षाद्वीप को प्रज्वलित कर पवित्रेस्थो...इस मन्त्र से पवित्र धारण करके ॐरामाय नमः आदि मन्त्रों से तीनवार आचमन एवं हस्त प्रक्षालन करके 'ॐअपवित्रः पवित्रो वा...इस मन्त्र से पूजा के उपकरण एवं स्वयं को अभिषिक्त कर हाथ में पुष्प लेकर "ॐआनोभद्रा से आरम्भकर ॐशान्तिः शान्तिः पर्यन्त भद्रसूक्त का पाठकरे। तत्पश्चात् संकल्प कर श्रीहनुमानजी का षोडशोपचार द्वारा पूजन करके पुण्याह वाचन करावे। पूर्व दिशा में जिनका अग्र भाग है ऐसे दर्भों को अनाज के ढेर पर विछाकर उन दर्भों

ॐपूर्णादर्विपरापतसुपूर्णापुनरापत । वस्वेव विक्रीणा वहाऽइषमूर्जं शतक्रतो ।

ततः नारिकेलं संस्थापयेत्-

ॐश्रीश्चते लक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मइषाण सर्वलोकम्म इषाण ।

ततः कलशमध्ये श्रीरामस्य धनुर्बाणावावाह्य पञ्चोपचारैः पूजयेत् ।

असुराणां घातकौसुराणां भयनाशकौ प्रपन्नमोक्षप्रदौ श्रीरामधनुर्वाणौ इहागच्छतमिहतिष्ठतम् । सर्वोपचारार्थम् गन्धाक्षतपुष्पाणि समर्पयामि ।

स्वचिह्नबाहुमूलेभ्यः सीतारामाङ्घ्रिभक्तिदौ ।
श्रीराममुष्टिशोभाप्तौ धनुर्वाणौ नमाम्यहम् ॥

पुण्याह वाचनम्

ततो दर्भहस्तान् चतुः संख्याकान् श्रीवैष्णवान् ब्राह्मणान् स्वपुरतः संप्रतिष्ठाप्य तन्मुखेन पुण्याहवाचनं कारयेत् ।

ततो जलाक्षतगन्धपुष्पताम्बूलदक्षिणादिभिः तान् पूजयेत् ते च यजमानवचनानुसारेणानुकूलानि प्रतिवचनानि बदेयुः ।

यजमानः ॐशिवा आपः सन्तु-इति तेषां हस्तेषु जलं दद्यात् ।

श्रीवैष्णवाः-सन्तु शिवा आपः । इति प्रतिपदेयुः ।

यज० ॐसौमनस्यमस्तु-इति पुष्पम्...

श्रीवैष्णवाः-अस्तु सौमनस्यम् (इतिप्रतिवचनम्)

के ऊपर सूत्र जिसमें लपेटा हुआ है ऐसे घटको स्थापित करके "ॐभूर्भुवः स्वरोम्" इस व्याहृति मन्त्र के द्वारा पवित्र जलसे भरकर कलशाधार स्थान को अग्रिम मन्त्र के द्वारा सुसंस्कृत करे ।

तत्पश्चात् 'धान्यमसि धिनुहिदेवान्...इस मन्त्र के द्वारा धान्यराशि को फैलावे । पुनः आजिघ्र कलशं मह्यात्वा...इस मन्त्र के द्वारा कलश को संस्थापित करे । ॐवरुणस्योत्तम्भनमसि...इस मन्त्र के द्वारा कलश में पवित्र जल भर दे । त्वां गन्धर्वा अखनं स्त्वा...इस मन्त्र के द्वारा कलश में गन्ध चन्दनादि डाले । याऽओषधिः...इस मन्त्र के द्वारा कलश में सर्वौषधि रखे । काण्डात्काण्डातप्ररोहन्ति...के द्वारा २१ दर्भो

यज. ॐअक्षतञ्चारिष्टञ्चास्तु-इति अक्षतान्...

श्रीवैष्णवाः-सन्तु अक्षतमरिष्टं च (प्रति.)

यज. ॐगन्धाः पान्तु...इति तेषां हस्तेषु गन्धदानम्

श्रीवैष्णवाः-सौमङ्गल्यञ्चास्तु (प्रतिवचनम्)

यजमानः-ॐअक्षताः पान्तु...हस्तेषु अक्षतदानम्

श्रीवैष्णवाः-आयुष्यमस्तु-(प्रति.)

यजमानः-ॐपुष्पाणि पान्तु-पुष्पदानम्

श्रीवैष्णवाः-सौश्रियमस्तु-(प्रति.)

यजमानः-ॐसफलानि ताम्बूलानि पान्तु-ताम्बूलादिदानं

श्रीवैष्णवाः-ऐश्वर्यमस्तु-प्रतिवचनम्

यजमानः-ॐदक्षिणाः पान्तु-दक्षिणादानम्

श्रीवैष्णवाः-बहुदेयञ्चास्तु...प्रतिवचनम्

यजमानः-भो भो श्रीवैष्णवा अस्मिन् पुण्याहवाचनकर्मणि भवतां मनः समाधीयताम्। समाहितमनसः स्मः, इति श्रीवैष्णवानां प्रतिवचनम्। यजमानः-प्रसीदन्तु भवन्तः, श्रीवैष्णवा-प्रसन्नाः स्मः, यजमानः-भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये, श्रीवैष्णवाः-वाच्यताम्। ततः कुम्भं वामहस्ते निधायदक्षिणेनाच्छाद्य-यजमानः-भो भो श्रीवैष्णवाः-भगवदाज्ञया भगवतः श्रीरामस्यनित्यकैङ्कर्यलक्षणस्य श्रीवैष्णवसंन्यासाख्यस्य कर्मणः पुण्याहं भवन्तो व्रुवन्तु। श्रीवैष्णवाः-पुण्याहमस्तु (इति वारत्रयं व्रूयुः)

से बना हुआ कूर्च कलश में स्थापित करे। एवं कूर्चाग्रराक्षसाड्धाराञ् इत्यादि के द्वारा कूर्च की स्तुति करे। वृक्षराज समुद्भूता...इस मन्त्र के द्वारा कलश में पञ्चल्लवों को स्थापित करे। ॐस्योनापृथिवीनो...इस मन्त्र के द्वारा कलश में सप्तमृत्तिकाओं को स्थापित करे। याः फलनीर्याऽअफलाः इस मन्त्र के द्वारा कलश के अन्दर सुपारी रखे। ॐपरिवाजपतिः इत्यादि मन्त्र द्वारा कलश में पञ्चरत्नों को स्थापित करे। ॐ हिरण्यगर्भः समवर्त्तताग्रे...इस मन्त्र के द्वारा कलश के अन्दर सुवर्ण रखे। ॐसुजातो ज्योतिषा० इस मन्त्र के द्वारा कलश को वस्त्र से लपेट दे। ॐपूर्णादर्वि परापत...इस मन्त्र के द्वारा कलश के ऊपर पूर्ण पात्र स्थापित करे। ॐश्रीश्चते लक्ष्मीश्च पत्न्या...इस

यज. भो भो श्रीवैष्णवाः भगवदाज्ञया भगवतः श्रीरामस्य नित्यकैङ्कर्यलक्षणस्य श्रीवैष्णवसंन्यासाख्यस्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु । श्रीवै. कल्याणमस्तु (इति वारत्रयं ब्रूयुः) यज. भो भो श्रीवैष्णवाः भगवदाज्ञया भगवतः श्रीरामस्य नित्यकैङ्कर्यलक्षणस्य श्रीवैष्णवसंन्या साख्यस्य कर्मणः ऋद्धिरस्त्विति भवन्तो ब्रुवन्तु । श्रीवैष्णवाः-ऋद्धिरस्तु कर्मऋद्ध्यताम् (वारत्रयम्) यज. भो भो श्रीवैष्णवाः भगवदाज्ञया भगवतः श्रीरामस्य नित्यकैङ्कर्यलक्षणस्य श्रीवैष्णवसंन्यासाख्यस्य कर्मणः स्वस्ति भवन्तो ब्रुवन्तु । श्रीवैष्णवाः-स्वस्त्यस्तु (वाचत्रयम्) यज. भो भो श्रीवै ष्णवाः भगवदाज्ञया भगवतः श्रीरामस्य नित्यकैङ्कर्यलक्षणस्य श्रीवैष्णवसंन्या साख्यस्य कर्मणः पुण्याहे समृद्धिरस्तु शिवं कर्मास्तु प्रजापतिः प्रीयताम् इति भवन्तो ब्रुवन्तु श्रीवैष्णवाः-अस्तु प्रीयताम् भगवान् प्रजापतिः (वारत्रयम्) तदनन्तरं दर्भकूर्चेन पल्लवेन च पर्णपुटे जलं अधोनिर्दिष्टैः मन्त्रैः क्षिपन्तःब्रुयुः-

शान्तिरस्तु पुष्टिरस्तु, तुष्टिरस्तु, ऋद्धिरस्तु, अविघ्नमस्तु, आयुष्यमस्तु, आरोग्यमस्तु, धनधान्यसमृद्धिरस्तु गोभ्यो ब्राह्मणेभ्यश्च शुभम् भवतु । तत अरिष्टनिरसनमस्तु । इत्युक्त्वा जलं त्यजेत्-आग्नेय्यां दक्षिणस्यां च यत् पापं तत् प्रतिहतमस्तु पुनः-पर्णपुटे-उत्तरेकर्मणि अविघ्नमस्तु । उत्तरोत्तरमभि वृद्धिरस्तु, सर्वं शोभनमस्तु । सर्वाः सम्पदः सन्तु ।

तदनन्तरं पर्णपुटस्थितं जलं अधोलिखितं वाक्यं त्रिरुच्चार्य कुम्भे निक्षिपेत्-ॐशुभानि वर्द्धन्ताम् । ॐशान्तिः शान्तिः शान्तिः ।

ततः पूर्वोक्ताः चत्वारः श्रीवैष्णवाः कुशेन जलं स्पृशन्तः अधोलि खितान् शुद्धिमन्त्रान् सावधानतया पठेयुः ।

मन्त्र को पढकर पूर्णपात्र के ऊपर नारिकेल (श्रीफल) संस्थापित करे। तत्पश्चात् कलश के मध्य में सर्वेश्वर श्रीरामचन्द्रजी के धनुष और वाण का आवाहन करके पञ्चोपचार से उनकी पूजा करे। और असुराणां घातकौ...आदि दोनों मन्त्रों से उनकी प्रार्थना करें। जो दैत्यों का विनाश करनेवाले हैं एवं देवताओं के भयका निवारण करनेवाले हैं एवं शरणागत को मोक्ष प्रदान करनेवाले हैं ऐसे भगवान् श्रीरामचन्द्रजी के धनुष और बाण इस कलश के मध्य आकार विराजमान होवें ।

शुद्धयेस्तु परोदेवो वासुदेवोऽस्तु शुद्धये ।
सङ्कर्षणः शुद्धयेस्तु प्रद्युम्नश्चास्तु शुद्धये ॥
शुद्धयेस्त्वनिरुद्धोऽपि केशवश्चास्तु शुद्धये ।
नारायणोऽस्तु विश्वेशः शुद्धये सर्वकर्मसु ॥
शुद्धयेमाधवश्चास्तु सर्वलोकहितेरतः ।
गोविन्दः शुद्धये चास्तु परमात्मा सनातनः ॥
शुद्धये विष्णुरस्त्वाद्यः शुद्धये मधुसूदनः ।
सर्वलोकहितोदेवः शुद्धयेऽस्तु त्रिविक्रमः ॥
वामनः शुद्धये चास्तु श्रीधरश्चास्तु शुद्धये ।
शुद्धयेऽस्तु हृषीकेषः पद्मनाभोऽस्तु शुद्धये ॥
सदा दामोदरो देवः शुद्धयेऽस्तु जगत्पतिः ।
शुद्धये पद्मनाभोऽस्तु शुद्धयेऽस्तु सदा ध्रुवः ॥
अनन्तः शुद्धये चास्तु शक्त्यात्मा चास्तु शुद्धये ।
सर्वकर्मसु चैवास्तु शुद्धये मधुसूदनः ॥
सदा विद्याधिदेवोऽस्तु शुद्धये कपिलस्तथा ।
शुद्धये विश्वरूपोऽस्तु शुद्धयेऽस्तु विहङ्गमः ॥
क्रोडात्मा शुद्धये चास्तु शुद्धये वडवानलः ।
शुद्धयेऽस्तु सदाधर्मश्चास्तु वागीश्वरस्तथा ॥
देव एकार्णवशयः शुद्धयेऽस्तु निरन्तरम् ।
शुद्धयेऽस्तु सदा देवः कूर्मः पातालधारकः ॥

जो धनुष बाण अपने से चिह्नित बाहुमूल वाले भक्त मानवों जनकनन्दनी श्रीसीताजी सहित भगवान् श्रीरामचन्द्रजी के चरणों में भक्ति भावना प्रदान करनेवाले हैं । और जो भगवान् श्रीरामचन्द्रजी की मुठ्ठी का सम्पर्क पाने के कारण सुशोभित हुए हैं । ऐसे श्रीरामजी के धनुष बाणों को मैं प्रणाम करता हूँ ।

तत्पश्चात् हाथ में दर्भ (कुश) धारण किये हुए चार श्रीवैष्णव ब्राह्मणों को, संन्यास ग्रहण करने के लिये दीक्षित मुमुक्षु यजमान अपने आगे सम्यक् प्रकार से आसन पर वैठाकर उनके मुँह से पुण्याह वाचन करावें । तत्पश्चात् जल अक्षत गन्ध

वराहः शुद्धयेचास्तु नारसिंहोऽस्तु शुद्धये ।
अमृताहरणश्चास्तु शुद्धये सर्वकर्मणाम् ॥
श्रीपतिः शुद्धयेचास्तु शान्तात्मा चास्तु शुद्धये ।
शुद्धये राहुजिच्चास्तु कालनेमिघ्न एव च ॥
पारिजातहरश्चास्तु लोकनाथोऽस्तु शुद्धये ।
सर्वत्र शुद्धयेचास्तु दत्तात्रेयोमहाप्रभुः ॥
न्यग्रोधशायी भगवान् शुद्धयेचास्तु सर्वदा ।
एकशृङ्गतनुश्चास्तु वामनश्चापि शुद्धये ॥
त्रिविक्रमः शुद्धयेऽस्तु शुद्धयेऽस्तु नरः सदा ।
नारायणः शुद्धयेऽस्तु हरिकृष्णश्च शुद्धये ॥
ज्वलत्परशुधृग्रामः शुद्धयेऽस्तु धनुर्धरः ।
रामश्च शुद्धयेचास्तु वेदविद्भगवाँस्ततः ॥
शुद्धयेऽस्तु सदा कल्की सर्वदोषक्षयंकरः ।
शुद्धयेऽस्तु सदा देवः पातालशयनः प्रभुः ॥
शुद्धये सन्तु सर्वेषां सर्वे सर्वत्र सर्वदा ।
एते सर्वे सदा देवाः शान्तये सन्तु पूजिताः ॥
ऋद्धये पुष्टये सन्तु सिद्धये भक्तयेऽपि च ।
शिवाय मुक्तये सन्तु वृद्धये सर्वकर्मणाम् ॥
मन्त्राणां देशिकानाञ्च स्थानानामपि सर्वदा ।
पुत्रमित्र कलत्राणां दासीदासगवामपि ॥

पुष्प ताम्बूल दक्षिणा आदि से मन्त्र पाठ पूर्वक उनचारो श्रीवैष्णव ब्राह्मणों की पूजा करें। एवं अपने प्रार्थना के अनुकूल उन से प्रति वचन बोलावे। शिवा आपः सन्तु आदि संकेतित मन्त्रों को उच्चारण करे एवं संकेतित प्रत्युत्तर उनसे कहलावे। साथ ही गन्ध आदि निदिष्ट वस्तु प्रदान करें। यह क्रम दक्षिणा पान्तु, बहुदेयञ्चास्तु पर्यन्त करें।

तत्पश्चात् यजमान ब्राह्मणों को प्रार्थना करे कि हे श्रीवैष्णव ब्राह्मणो इस पुण्याह

वेदशास्त्रागमादीनां व्रतानामिष्टसम्पदाम् ।
मनोरथानां सर्वेषां हितानां सन्तु सर्वदा ॥
आयुष्यारोग्यमेधानांधनधान्यादि सम्पदाम् ।
पुण्यानामणिमादीनां गुणानांश्रेयसामपि ॥
राज्ञोजनपदस्यापि यजमानस्य मन्त्रिणाम् ।
वैष्णवानां विशेषेण परत्रहितमिच्छताम् ॥
पञ्चकालविशुद्धानां सत्वस्थानांशुभात्मनाम् ।
स्वस्त्यस्तु च शिवं चास्तु शुभं चास्तु पुनः पुनः ॥
अविघ्नमनिशं चास्तु दीर्घमायुष्यमस्तु वै ।
समाहितं मनश्चास्तु सम्पदश्चोत्तरोत्तरम् ॥
पुण्याहं शुद्धयेचास्तु वासुदेवादिमूर्त्तयः ।
शङ्खचक्रगदापद्मयुक्तः सर्वेश्वरेश्वरः ॥
प्रीयतां भगवान्देवो लाङ्गली प्रीयतां सदा ।
प्रद्युम्नः प्रीयतां नित्यमनिरुद्धः सुरेश्वरः ॥
नारायणः सुरेशोऽपि कर्मणां पूरणाय च ।
न्यूनाधिकानां शान्त्यर्थं प्रीयतां प्रीयतां विभुः ॥

तदनन्तरं कुम्भे वरुणस्वरूपिणम्भगवन्तं साकेताधिनाथं श्रीरामचन्द्रं सप्रार्थनमावाह्य-पुरुषसूक्तेन षोडशोपचारेण च सम्पूज्य मूलमन्त्रेणाष्टोत्तर शतेनाभिमन्त्रयेत् । तज्जलेन च समस्तसंन्याससम्भारान् स्वात्मानञ्च प्रोक्षयेत् । तन्मन्त्रं यथा-

वाचन कर्म में आप सभी का मन एकाग्र होवे । एवं ब्राह्मण एकाग्रचित्त हैं ऐसा प्रत्युत्तर देवें । इसीतरह प्रसन्नां स्मः पर्यन्त प्रति वचन के वाद पुनः प्रार्थना करे कि हे श्रीवैष्णव ब्राह्मणो आप सभी से अनुमत होकर शरणागत परिपालक भगवान् श्रीरामचन्द्रजी की आज्ञा से श्रीरामजी के नित्य कैङ्कर्य स्वरूप श्रीवैष्णव संन्यास धारण नामक कर्म का पुण्याह आपलोग कहें । इस प्रार्थना के वाद तीनवार पुण्याहमस्तु यह उच्चारण करें । इसीप्रकार कल्याण ऋद्धि स्वस्ति समृद्धि आदि वाचन की प्रार्थना

ॐवास्तोस्पते प्रतिजानी ह्यास्मान् स्वावेशोऽनमवोभवानः । यत्वेमहे प्रतितन्नो जुषस्वशन्नो भव द्विपदेशञ्चतुष्पदे ।

ॐवास्तोष्पते प्रतरणो न एधि गयस्कानो गोभिरश्वेभिरिन्दो । अजरासस्ते सख्येस्यामः पितेव पुत्रान्प्रति तन्नो जुषस्व । शन्नो भव द्विपदे शञ्चतुष्पदे ।

ॐवास्तोष्पते शग्मया संसदाते सक्षीमहिरण्मयागातुमत्या । आवहक्षेम उत योगेवरन्नो यूयं पातस्वस्तिभिः सदा नः ॥

ॐअमीवहा वास्तोष्पते विश्वारूपाण्याविशन् सखा सुखा सुशेव एधिनः ॥

ॐस्वस्तिन इन्द्रो वृद्धश्रवाः । स्वस्तिनः पूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥

तत्पश्चात् ॐआपोहिष्ठामयोभुवः ॐतानऊर्जे दधातन, इति द्वाभ्यां मन्त्राभ्यां श्मश्रुलोमनखान् नियोजयित्वा वपनं कारयेत् । तदुक्तं कात्यायन स्मृतौ–

आपोहिष्ठा इति द्वाभ्यां श्मश्रुलोमनखानि च ।
गोदानकविधानेन सर्वमन्त्रान्नियोजयेत् ॥
ततः समाचरेत्स्नानं हेमरुप्यकुशाम्भसः ।
कृत्वा तु वपनं विद्वान् भवेन्मुण्डोऽथवा शिखी ॥
स्नानमब्देवतैः कृत्वा तर्पयेत्पितृदेवताः ।
ऋषीं छन्दांसि वेदांश्च मनुष्यांश्च यथा विधि ॥

करे। एवं तीन तीन वार उत्तर में ब्राह्मण प्रत्युच्चारण करें। एवं भगवान् प्रजापति प्रसन्न हों यह तीन वार उच्चारण करें ।

इसके वाद दर्भ (कुश) से बनाहुआ कूर्च के द्वारा एवं पल्लव के द्वारा पत्ता के दोना में जल टपकावें एवं मन्त्रों का ब्राह्मण उच्चारण करते जायें एवं उक्त साधनों से जल टपकाते रहें । पुनः उन्ही साधनों से दोना के बाहर ईशान कोण में अरिष्ट निरसनमस्तु कहकर जल प्रक्षिप्त करे। एवं आग्नेय कोण तथा दक्षिण दिशा में "यत् पापं तत् प्रतिहतमस्तु कहकर जल प्रक्षेप करें। पुनः पत्ता के दोना में जल प्रक्षिप्त

इति वचनमनुसृत्यमुण्डनानन्तरं स्नात्वा पितॄन् देवानृषीन् छन्दांसि वेदान्मनुष्यांश्च तर्पयित्वा कुत्रचिद्देवमन्दिरे ग्रामे नदीत्स्टे वने वा उपविश्य दक्षिणजानोः उपरि उत्तानं वामहस्तं निधाय तत्र द्वे पवित्रे स्थापयित्वा, पवित्रोपरि उत्तानेन दक्षिणपाणिना विधानं कुर्यात् । इत्थं ब्रह्माञ्जलिं विधाय ब्रह्मणे नमः, इन्द्राय नमः, सूर्याय नमः, आत्मने नमः, परमात्मने नमः, इति मन्त्रं जपेत् । ततः आचम्य प्राणानायम्य मूलमन्त्रं जपेत् ।

तत्पश्चात् ओङ्कारोच्चारणेन सह सक्तुमुष्टीं मुक्त्वा आचम्य त्रिभिः मन्त्रैः नाभिमभिमन्त्रयेत् । ते च मन्त्राः ॐआत्मने स्वाहा, ॐअन्तरात्मने स्वाहा, ॐप्रजापतये स्वाहा इति ।

ततः "त्रिवृदसि त्रिवृतेत्वा" इति मन्त्रेण पयोदधिघृतानि प्रथमं प्राश्नीयात् । पुनः प्रवृदसि प्रवृत्तेत्वा इतिमन्त्रेणपयोदधिघृतानि प्राश्नीयात् । पुनश्च विवृदसि वृवृतेत्वा इति मन्त्रेण तृतीयवारंप्राश्नीयात् । तत्पश्चात्- ॐआपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु मां पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु मां यदुच्छिष्टमभोज्यञ्च यद्वा दुश्चरितं मम सर्वं पुनन्तु मा मापोऽसतां च प्रतिग्रहं स्वाहा इति मन्त्रेण उदकं प्राश्नीयात् । ततः उपवासस्य संकल्पं विधाय सावित्रीं प्रविशेत् । तदुक्तं श्रीबोधायनेन ग्रामान्ते ग्रामसीमान्तेऽग्न्यगारे वा आज्यं पयोदधि संयुतं त्रिः प्राश्योपवसेत् । त्रिवृदसीति त्रिभिर्मन्त्रैः प्राश्नीयात् सकृदप "आपः पुनन्त्विति" पय आज्यालाभेऽअपः प्राश्नीयात् ।

करते हुये "उत्तरोत्तरमभिवृद्धिरस्तु" यह उच्चारण करें । एवं सर्वं शोभनमस्तु यह उच्चारण करें । एवं सर्वाः सम्पदः सन्तु यह उच्चारण करें ।

इसके वाद पत्ते के दोना में विद्यमान जल को अधोलिखित वाक्य को तीनवार उच्चारण करके घट में रख देवे । एवं ॐशुभानि वर्द्धन्ताम् ॐशान्तिः शान्तिः शान्तिः यह मन्त्र पढें । तत्पश्चात् पुण्याह वाचन करनेवाले पूर्व वर्णित चारों श्रीवैष्णव ब्राह्मण कुश से जल का स्पर्श करते हुये, अर्थात् कुश स्पृष्ट जल से यजमान को अभिषिक्त करते हुए अधोलिखित शुद्धिकारक मन्त्रों को पढें । परमात्मा परब्रह्म परमेश्वर शुद्धि जनक हों वासुदेव सङ्कर्षण एवं प्रद्युम्न यजमान के शुद्धिकारी होवें । भगवान् अनिरुद्ध शुद्धि के लिये हों एवं केशव भी शुद्धि जनक हों समस्त भुवनों के अधिनायक मानवों

श्रीबोधायनोक्तदिशा सावित्रीप्रवेशस्वरूपं यथा..."ॐभूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यं" ॐभुवः सावित्रीं प्रविशामि भर्गोदेवस्य धीमहि" "ॐस्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात्"। ॐभूर्भुवः स्वः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात् ।

सावित्रीप्रवेशानन्तरं किञ्चनापः प्राश्य, ब्रह्माणमुपवेश्य, ब्रह्मान्वाधानं कुर्यात् । तत् श्रीमताबोधायनाचार्येण निरूपितं यथा-पुरादित्यस्तमयाद् गार्हपत्यमुपसमाधायान्वाहार्यपचनमाहृत्यज्वलन्तमाहवनीयमुद्धृत्य गार्हपत्य माज्यं विलाप्योत्पूयसुचिचतुर्गृहीत्वा समिद्धेह्याहवनीये पूर्णाहुतिं जुहोत्यों स्वाहा इत्येतद् ब्रह्मान्वाधानमिति विज्ञायते ।

तत्पश्चात् सन्ध्यावन्दनं विधाय सवितरि अस्तमिते स्वयं स्वाग्नौ पुरुषसूक्तेन होमं कुर्यात् । पुरुषसूक्तेन हवनक्रिया सम्पादनानन्तरं सायं अग्निहोत्रे हुते उत्तरस्यां गार्हपत्यानि तृणानि संस्तीर्य तदुपरि त्रिदण्डपात्रादीनि संस्थाप्य कन्थां वासः कौपीनादिकं च संस्थाप्य दक्षिणस्यां दिशि च आहवनीयं ब्रह्मायतने कुशान् आस्तीर्य कृष्णाजिनमन्तर्धायैतां रात्रीं जागर्तीति श्रीबौधायनवचनम् । दत्तात्रेयस्मृतावप्युक्तम्-

के एक मात्र गति भगवान् श्रीनारायण समस्त क्रिया कलाप में शुद्धि शुद्धि के लिये हों । समस्त चराचर जगत का कल्याण करने में तत्पर माधव शुद्धिकारी हों । सनातन परमात्मा गोविन्द शुद्धि जनक हों । आदि विष्णु समस्त भुवनों में कण कण में व्यास रहनेवाले शुद्धिकारक हों तथा मधुसूदन शुद्धिकारी हों । सभी लोकों का हितैषी देवता त्रिविक्रम शुद्धिजनक हों, वामन शुद्धि के लिये हों एवं अज शुद्धि के लिये हों श्रीधर शुद्धि के लिये हों । सदैव देव दामोदर हृषीकेश (समस्त इन्द्रियों के स्वामी) एवं पद्मनाभ शुद्धिकारक होवें । शुद्धि के लिये पद्मनाभ हो तथा ध्रुव शुद्धि के लिये हों । अनन्त देव शुद्धि के लिये हों एवं शक्त्यात्मा शुद्धि के लिये हों । और समस्त कर्मों में शुद्धि के लिये मधुसूदन हों । विद्याओं के अधिदेवता भगवान् कपिल हर समय शुद्धि के लिये हों । विश्वरूप शुद्धि के लिये हों, तथा आकाश चारी विहङ्गम शुद्धि के लिये हों । शूकरावतारधारी वाराह विष्णु शुद्धि के लिये हों । तथा समुद्री वडवानल

होमं दत्वा तथासायं कुशान् कृष्णाजिनं ततः ।
ब्रह्मस्थाने समास्तीर्य ब्रह्मभावेन संस्थितः ॥
ब्रह्मरात्रीं ततो दत्वा विष्णौ संन्यस्यमानसम् ।
समभ्यर्च्यहृषीकेशं जपन्नेकाक्षरं परमिति ॥

श्रीबौधायनस्मृतावप्युक्तम्-य एवं विद्वान् ब्रह्मरात्रीमुपोष्य ब्राह्मणोऽग्नीन् समारोप्य वा प्रमीयते सर्वं पाप्मानं तरति तरति ब्रह्महत्याम् ॥ तत्पश्चाद् ब्राह्मेमुहुर्ते उत्थाय सन्ध्यावन्दनान्तं नित्यकृत्यं परिसमाप्य, आहिताग्निश्चेत् प्राजापत्येष्टिं कुर्यात् एकाग्निश्चेदाग्नेयीम् । दत्तात्रयेनाप्यभिहितम्-

ब्रह्मरात्री ततो दद्यात् पौर्णमास्यां द्विजोत्तमः ।
प्रातर्हुत्वा स्वकल्पेन कृत्वास्नानादिकां क्रियाम् ॥
प्राजापत्यां प्रतिपदि कृत्वेष्टिं तु यथा विधि ।
ततो विप्राय दद्यात्तु सर्ववेदसदक्षिणाम् ॥

शुद्धिकारी हों सदैव धर्म शुद्धि के लिये हों, तथा वागीश्वर शुद्धि के लिये हों। प्रलयकाल में समस्त भूमण्डल समुद्र जल से आप्लावित हो जाने के कारण एक मात्र समुद्र स्वरूप भुवन मण्डल हो जाता है, वे एकार्णवात्माभिरन्तर भगवान् शुद्धि के लिये हों पाताल को धारण करनेवाले कूर्म स्वरूप भगवान् विष्णु सदैव शुद्धिकारी हों। और वाराह भगवान् शुद्धि के लिये हों एवं नृसिंह भगवान् शुद्धि के लिये होवें। अमृत का आहरण करनेवाले सर्वेश्वर सभी कर्मकलापों की शुद्धि के लिये होवें। और लक्ष्मी नायक भगवान् शुद्धि के लिये हों एवं शान्तात्मा शुद्धि के लिये हों। राहु के ऊपर विजय प्राप्त करनेवाले शुद्धि के लिये हों तथा कालनेमि का वध करनेवाला भगवान् शुद्धिकारी हों। एवं पारिजात हरण करनेवाले भगवान् शुद्धिजनक हों तथा लोकनाथ शुद्धि के लिये हों तथा सभी स्थानों पर शुद्धि के लिये महाप्रभु दत्तात्रेय हों। वट पत्र पर शयन करनेवाले भगवान् मुकुन्द हर समय शुद्धि के लिये हों। एक श्रृंग शरीरधारी मत्स्यावतारी विष्णु शुद्धि के लिये हो, तथा भगवान् वामन भी शुद्धि के लिये हों। भगवान् त्रिविक्रम शुद्धि के लिये हों तथा नर-नारायण और हरिकृष्ण शुद्धि के लिये हों। जाज्वल्यमान फरसा को धारण करनेवाले परशुराम शुद्धि के लिये हों

पुनश्च अग्नये वैश्वानराय द्वादशकपालं पुरोडाशं निर्वपति, प्राजापत्यं चरुं वैष्णवं नवकपालं च । पुरुषसूक्तेन हुत्वा अग्निमुपतिष्ठेत् सहस्त्रशीर्षेत्य नेनानुवाकेनेति ।

ततः "आयुर्दा अग्ने हविषो जुषाम" इति मन्त्रेण अग्निं समीपे स्थापयित्वा प्रक्षाल्य प्राश्नाति, सहस्त्रशीर्षा इत्युनुवाकेनप्राश्य आचम्य- "ब्रह्मयज्ञानम्प्रथमंपुरस्ताद् विसीमतः सुरुचोव्वेन आबः, सबुध्न्याऽउप माऽअस्य विष्ठाः सतश्चयोनिमसतश्चविव्वः" इति मन्त्रेण अग्निद्रव्यमग्नौ प्रक्षिप्य ।

"सं मासिञ्चन्तु मरुतः समिन्द्रः संबृहस्पतिः संमायमग्निं सिञ्चत्वायुषा च बलेन चायुमन्तं करोतु माम्" इति मन्त्रं जपित्वा "या ते अग्ने यज्ञियास्त नूस्तयेह्यारोहात्मानमच्छा वसूनि कृण्वन्न स्मेनर्यी पुरुणि यज्ञोभूत्वा यज्ञमासीद स्वां योनिं जातवेदो भुव आ जायमानः सक्षय एहि" इति मन्त्रेण त्रिः आत्मनि अग्नीन् समारोप्य । तत्पश्चात् "अयं ते योनिर्ऋत्विजो यतो जातः प्राणादरोचथाः । तं प्राणं जानन्नग्न आरोहाया नोवर्धय रयिम्" इत्यनेन मन्त्रेणाग्निमाजिघ्रेत् । ततो मोक्षमन्त्रं जपेत् ।

एवं धनुर्धारी श्रीरामजी तथा वेद ज्ञानी भगवान् शुद्धि के लिये हों । समस्त दोषों का संहार करनेवाले भगवान् कल्कि सदैव शुद्धिजनक होवे तथा पाताल में शयन करनेवाले सर्व सामर्थ्य सम्पन्न देव शुद्धि के लिये हों । सभी का सभी स्थानों पर हर समय उपयुक्त देवगण शुद्धि के लिये हों । तथा ये सभी देवता पूजित होकर शान्ति कारक होवें । एवं ऋद्धि-पुष्टि-सिद्धी, भक्ति, कल्याण एवं मुक्ति के लिये सहायक हों तथा सभी कर्मों की अभिवृद्धि के लिये सहायक हों । मन्त्रों का आचार्यों का और स्थानों का तथा हर समय पुत्र, मित्र, स्त्री, दासी, दास, गो-धन, वेद, शास्त्र, आगम आदि तथा व्रतों अभिष्ट सम्पत्तियों हितकारी समस्त अभिलाषाओं का सदैव पूर्ण करनेवाले हों । आयुष्य आरोग्य मेधा धन धान्य आदि सम्पत्ति पुण्य अणिमा आदि सिद्धियाँ गुण समुदाय एवं कल्याणों का भी तथा राजा जनपद यजमान एवं मन्त्रधारी वैष्णवों का विशेष रूपसे परलोक में कल्याण चाहनेवाले पाँचों कालों में विरुद्ध होनेवाले प्राणियों एवं शुभकारी आत्माओं का स्वस्ति परं कल्याण एवं पुनः पुनः शुभ

"य एष हवा अग्नेर्योनिर्यः प्राणः प्राणं गच्छ स्वाहा" इत्येवमेवैतदाह। ग्रामादग्निमाहृत्य पूर्ववदग्निमाघ्रापयेत्। यदि अग्निं नलभेत् तदा अप्सु जुहुयात्। "आपो वै सर्वादेवताः, सर्वादेवताः, सर्वाभ्यो देवताभ्यो जुहोमि स्वाहा" इति मन्त्रेण जले हुत्वा साज्यं हविः उद्धृत्य प्राश्नीयात्। "अयं मोक्षमन्त्रः त्रय्या" इति वदेत्। ततः पूर्वाश्रमस्य यज्ञोपवीतं हस्ते गृहीत्वा जलेन आर्द्रीकृत्य-वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगात् यतयः शुद्धसत्वाः। ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे" इति मन्त्रेण अप्सु जुहुयात्। पुनश्च-एकैकमुपवीतं स्याद् यतीनां ब्रह्मचारिणाम्। इति सिद्धान्तमनुरुध्य शुक्लमेकं यज्ञोपवीतं विधिवत् धारयेत्। तदुक्तम्-

श्वेता दन्ता नखाः श्वेताः श्वेताः श्रीदण्डमुद्रिकाः।
यज्ञसूत्रं दण्डवस्त्रं पञ्चश्वेताः प्रकीर्तिताः॥

हों। दिन-रात सभी समय में विविधता हो, दीर्घायुष्य युक्त जीवन हो। सदैव मन एकाग्र रहे। उत्तरोत्तर ऐश्वर्यों में अभिवृद्धि हो एवं वासुदेव आदि त्रिमूर्ति पुण्यों एवं शुद्धि के लिये हों। शङ्ख चक्र गदा पद्मयुक्त सर्वेश्वर विष्णु प्रसन्न हों। भगवान् बलराम जो हल नामक अस्त्र को धारण करते हैं वे सदा प्रसन्न रहें भगवान् प्रद्युम्न नित्य प्रसन्न रहें तथा देवनायक अनिरुद्ध प्रसन्न हों। देवाधिदेव नारायण कर्मों को पूर्ण करनेवाले हों। एवं सर्वत्र व्यापक परमात्मा विष्णु न्यून-अधिक दोषों की शान्ति के लिए सदैव प्रसन्न रहें।

तत्पश्चात् कुम्भ (घट) में वरुण स्वरूपधारी साकेतलोकाधिनायक श्रीरामचन्द्रजी को प्रार्थना पूर्वक आवाहन करके पुरुषसूक्त के मन्त्रों से अर्ध्य पाद्यादि षोडशोपचार पूजन विधि से श्रद्धा भक्ति पूर्वक पूजा करके कुम्भ को ब्रह्मतारक श्रीराममन्त्र से एक सौ आठ वार मन्त्र पढकर अभिमन्त्रित करें। तत्पश्चात् घट के जल से समस्त संन्यास धारण करने की साधन सामग्री एवं यजमान स्वयं को अभिसिञ्चित करें। अभिसिञ्चित करने के मन्त्र "ॐवास्तोस्पते प्रतिजानिः"..."ॐवास्तोस्पते प्रतरणोन"..."ॐवास्तोस्पते शगभया"..."ॐअमीवहा वास्तोस्पते"...इन उपर्युक्त मन्त्रों से संन्यास सामग्री एवं स्वयं को अभिषिक्त करने के पश्चात् "ॐआपोहिष्ठामयो भुवः, ॐतान ऊर्जे दधातन" इन दोनों मन्त्रों से दाढी मूछ आदि को जल से सिक्तकर यजमान क्षौर कर्म करावें। इस वात को कात्यायन स्मृति में कहा गया है कि

ततो गुरुः भगवतो परब्रह्मस्वरूपस्य साकेताधिनाथस्य श्रीरामचन्द्रस्य स्वरूपं विचिन्त्य चरणद्वयावलम्बिनं शरणागतं "ॐआप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्रमथोबलमिन्द्रियाणि च । सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्मनिराकुर्यां मामा ब्रह्मनिराकरोदनिराकरणमस्तु अनिराकरणमस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु" इति मन्त्रमुच्चारयन्तम् उपसंगृह्य द्वादशधा ब्रह्मतारक श्रीराममन्त्रं मनसा समुच्चार्य तेनैव जलमभिमन्त्र्य शिष्यञ्चाभिषिच्य वक्ष्यमाणं शान्तिमन्त्रं पठेत् ।

ॐशंनो मित्रः शंवरुणः, शंनो भवत्वर्यमा, शं न इन्द्रो बृहस्पतिः, शंनो विष्णुरुरुक्रमः, ॐनमो ब्रह्मणे, नमस्ते वायो, त्वमेव प्रत्यक्षं ब्रह्मासि, त्वामेव प्रत्यक्षं ब्रह्मवदिष्यामि, ऋतं वदिष्यामि । सत्यं वदिष्यामि, तन्मामवतु, तद्वक्तारमवतु, अवतु मां, अवतु वक्तारम् ॥" "ॐभद्रं कर्णेभिः श्रृणुयामदेवाः भद्रं पश्येमाक्षभिर्यजत्राः, स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमदेव हितं यदायुः ।" "स्वस्ति न इन्द्रो बृद्धश्रवाः, स्वस्ति नः पूषा विश्ववेदाः, स्वस्तिनस्ताक्ष्यों अरिष्टनेमिः, स्वस्तिनो बृहस्पतिर्दधातु ॥" ॐशान्तिः शान्तिः शान्तिः ॥"

इति शान्तिपाठानन्तरं शिष्यशिरसि दक्षिणहस्तं दत्वा पुरुषसूक्तं पठित्वा "मम व्रते हृदयं ते दधामि" इत्युच्चार्य उत्तराभिमुखः दक्षिणे कर्णे प्रणवादिकम् उपदिश्य तदर्थमपि बोधयेत् ।

"आपोहिष्ठा" इन दो मन्त्रों से श्मश्रु लोम एवं नखों को गोदानक विधान से सभी मन्त्रों को जोडे । तत्पश्चात् सुवर्ण स्वरूप दर्भ के जल से स्नान आदि क्रिया सम्पन्न करें। क्षौर कर्म कराकर आत्मोद्धार का इच्छुक मुण्डि हो अथवा शिखाधारी हो जलीय देवताओं से स्नान करके पितृदेवों का तर्पण करें । तथा शास्त्रीय विधान के अनुसार ऋषि छन्द वेद एवं मनुष्यों का तर्पण करें । इन वचनों के अनुसार मुण्डन कराने के पश्चात् स्नान कस्के पितरों देवताओं ऋषियों, छन्दों वेदों एवं मनुष्यों का तर्पण कर लेने के पश्चात् कहीं पर मन्दिर गाँव नदी का किनारा अथवां वन में वैठकर दाहिना जाँघ के ऊपर उत्तान वाँया हाथ रखकर उस उत्तान हाथ के ऊपर दो पवित्री स्थापित करके पवित्री के ऊपर उत्तान दाहिना हाथ रखकर पवित्री को ढक दें । इस प्रक्रिया

ततः गुरुः सर्वलोकाभिमतं यथा सम्प्रदायं शिष्यस्य नामकरणं कुर्यात्। तच्च भगवन्नामसम्बद्धम् भवेदिति प्रयतेत। तत्पश्चात् तेनैव नाम्ना तम् आहूयात्।

पुनः शिष्यः भगवन्तं श्रीरामचन्द्रं मनसि ध्यात्वा प्रैषोक्तिमन्दमध्यम तारस्वरेण क्रमेण उच्चारयेत्। "ॐभूर्भुवः स्वः संन्यस्तं मया, संन्यस्तं मया, संन्यस्तं मया।" "पुत्रेषणायाश्च वित्तेषणायाश्च लोकेषणायाश्च सर्वभूतेभ्यश्च व्युत्थितोऽहं स्वाहा" इत्युत्वा अग्नौ अप्सु वा जुहुयात्। ततः "अभयं सर्वभूतेभ्योमत्तः स्वाहा" इत्यभिधाय बद्धाञ्जलिः प्राङ्मुखः उदङ्मुखो वा श्रीरामस्मरणं कृत्वा यथाधिकारं त्रिदण्डकमण्डलुप्रभृतिं गृहीत्वा संन्यासोचितं काषायवस्त्रादिकं च धारयित्वा श्रीरामं प्रार्थयेत्-दत्त्वातोयाञ्जलिं विप्रो भक्त्या सम्प्रार्थयेद्धरिम्। सर्वदेवात्मके तोये तोयाहुतिमहं हरे। दत्वा सर्वैषणां त्यक्त्वा युष्मच्छरणमागतः। त्राहि मां सर्वलोकेश गतिरन्या न विद्यते। संन्यस्तं भो जगन्नाथ पाहि मां मधुसूदन। त्राहि मां सर्वदेवेश रघुनाथ ? सनातन ?। संन्यस्तं मे जगद्योने पुण्डरीकाक्ष ? मोक्षद ?। अहं सर्वाभयं दत्वा भूतानां परमेश्वर ?॥ युष्मच्छरणमापन्नस्त्राहि मां पुरुषोत्तम ?। इति यमस्मृतिः। पूर्वं यद् दण्डादिधारणम् उक्तम् तेषां धारणे वक्ष्यमाणमन्त्रं पठेत्। तैस्तैरेवमन्त्रैः दण्डादीन् धारयेत्।

"इन्द्रस्य वज्रोऽसि वार्त्रघ्नः सर्वं मे यच्छ यत्पापं तन्निवारय।" इति मन्त्रेण दक्षिणे पाणौ त्रिदण्डं धारयेत्।

को ब्रह्माञ्जलि कहते हैं। इसप्रकार ब्रह्माञ्जलि बनाकर ब्रह्मणे नमः-से लेकर परमात्मने नमः पर्यन्त मन्त्रों को जपें। उपर्युक्त मन्त्रों को जपने के पश्चात् पूर्व निर्दिष्ट मन्त्रों से आचमन करके प्राणायामकर मूल मन्त्र का जप करें।

तत्पश्चात् ॐकार का उच्चारण करने के साथ-साथ एक मुट्ठी सत्तु को खाकर आचमन करके तीन मन्त्रों से जो ऊपर कहे गये हैं। उन आत्मने स्वाहा अन्तरात्मने स्वाहा आदि से अपनी नाभि को अभिमन्त्रित करें।

तत्पश्चात् त्रिविदसित्रिवृतेत्वा...इस मन्त्र को पढकर दूध दहि घी का प्रासन करें। पुनः प्रवृदसि प्रवृतेत्वा...इस मन्त्र से दूध दहि एवं घी का प्राशन करें। फिर

"ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यम् ॥" इति सप्तव्याहृतीः प्रणवेन सह समुच्चार्य कमण्डलुं धारयेत् ।

"ॐयुवा सुवासाः परिवीत् आगात् सउश्रेयाभवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसादेवयन्तः ॥" इति मन्त्रमुच्चार्य कौपीनं बहिर्वासान्श्च धारयेत् तदुक्तं बोधायनस्मृतौ-अथ दण्डमादत्ते सखा मां गोपा

तीसरे वार विवृदसि वृवृतेत्वा...इस मन्त्र से दूध दहि एवं घी का प्राशन करें तत्पश्चात् "ॐआपः पुनन्तु पृथिवीं पृथिवी...इस मन्त्र के द्वारा जल का प्राशन करें । तत्पश्चात् उपवास करने के लिये संकल्प करके सावित्री में प्रवेश करें । जैसा कि सम्प्रदाय के आचार्य प्रवर श्रीबोधायनजी के द्वारा कहा गया है कि गाँव के अन्तिम छोरपर अथवा गाँव की सीमा के पास या अग्निशाला में घृत दूध दहि से मिश्रित हविष को तीनवार खाकर उपवास करें । त्रिविदसि आदि मन्त्रों से तीनवार प्राशन करें एवं आपः पुनन्तु इस मन्त्र से एकवार जल का प्राशन करें । यदि घृत आदि उपलब्ध न हो तो केवल जलका प्राशन करें ।

इसप्रकार सम्प्रदायाचार्य आचार्य श्रीबोधायनजी के कथनानुसार आगे निर्दिष्ट किया जानेवाला सावित्री प्रवेश का मन्त्र स्वरूप है । वह "ॐभूः सवित्रीं प्रविशामि" से लेकर धियो योनः प्रचोदयात् पर्यन्त निर्दिष्ट मन्त्रों को यजमान स्वयं अपने मुख से उच्चाण करें सावित्री प्रवेश करलेने के पश्चात् थोडा सा जल प्राशन करके यज्ञ के ब्रह्मा को अपने पास वैठाकर ब्रह्मान्वाधान करें । यह श्रीमान् बोधायनाचार्यजी के द्वारा प्रतिपादित किया गया है जैसे कि भगवान् दिवाकर को अस्ताचल पर जाने से पहले गार्हपत्य अग्नि को लाकर अन्वाधान करके पुनः अग्नि को प्रज्वलित कर हवनीय वस्तु घृत आदि गार्हपत्य अग्नि में डालकर चार समिधाओं को प्रज्वलित आहवनीय अग्नि में घी से भीगाकर ॐस्वाहा ऐसा कहकर पूर्णाहुति दें इसी को ब्रह्मान्वाधान कहते हैं ।

तदनन्तर सन्ध्यावन्दन आदि क्रियाओं का सम्पादन कर सूर्य का अस्त हो जाने पर स्वयं ही अग्नि में पुरुषसूक्त के द्वारा हवन करें ।

पुरुषसूक्त के द्वारा हवन करलेने के पश्चात् सायंकालीन अग्नि होत्र क्रिया को सम्पन्न करके उत्तर दिशा की ओर अर्थात् संस्थापित अग्नि से उत्तर भाग में कुश को

येति । मैत्रायणी श्रुतिश्च कथयति-इन्द्रस्य वज्रोसीति त्रीन्वैणवान् दण्डान् दक्षिणे पाणौधारयेत् ततः परिव्राज्ये गृहीते सर्वान् बान्धवांस्त्यजेत् । "येन देवाः पवित्रेण आत्मानं पुनते सदा । तेन सहस्त्रधारेण पावमान्यः पुनन्तु माम् ॥" इति मन्त्रेण पवित्रीं धारयेत् ।

विछाकर जो गार्हपत्य तृण कहा जाता है उसके ऊपर त्रिदण्ड आदि साधनों को सम्यक् प्रकार से रखकर एवं कन्था, वस्त्र कौपीन आदि को भी रखकर, और दक्षिण दिशा में आहवनीय ब्रह्मायतन में अर्थात् ब्रह्मा के क्षेत्र में कुश को एवं हवनीय वस्तु को रखकर कालामृग चर्म से उसे ढककर इस रात्रि में जागरण करते हैं । ऐसा आचार्य श्रीबोधायनजी का मत है ।

दत्तात्रेय स्मृति में भी कहा गया है कि सायं काल में हवन करके कुश मृग चर्म को विछाकर ब्रह्म स्थान में ब्रह्मभाव से सम्यक् प्रकार से वैठा रहे । भगवान् श्रीरामजी में अपने मनको लगाकर भगवान् श्रीरामजी की पूजा करके प्रणव का जप करता हुआ ही सम्पूर्ण रात्रि जागरण करें ।

जो विद्वान् इसतरह ब्रह्मरात्रि का उपवास कर अग्नि को समारोपित कर संन्यास ग्रहण करता हैं वह ब्रह्महत्या आदि समस्त पापों को दूर करदेता है । तत्पश्चात् ब्राह्ममुहूर्त में उठकर सन्ध्या वन्दन पर्यन्त समस्त नित्य कर्म का सम्पादन करके यदि आहिताग्नि हो तो प्राजापत्य इष्टि करे यदि एकाग्नि हो तो आग्नेयी इष्टि करे । दत्तात्रेय के द्वारा भी कहा गया है कि इसके वाद श्रेष्ठ ब्राह्मण को पूर्णिमा की ब्रह्मरात्रि में दान देकर प्रातःकालीन हवन करके अपनी सम्प्रदाय परम्परा के अनुसार स्नानादि क्रिया सम्पन्न कर प्रतिपदा तिथि को विधान के अनुसार प्राजापत्य इष्टि सम्पन्न कर तत्पश्चात् ब्राह्मण के दक्षिणा सहित समस्त वेदों का दान दें । पुनः बारह कपालों में पुरोडाश पकाकर वैश्वानर अग्नि के लिए प्रदान करते हैं । एवं विष्णु देवता सम्बन्धि हविष्य नौ कपालों में पकाकर प्राजापत्य इष्टि सम्पन्न करते हैं । पुनः पुरुषसूक्त के द्वारा हवन करके सहस्त्रशीर्षा इस अनुवाक से अग्नि की उपासना करें इसके वाद आयुर्दा...इस मन्त्र से अग्नि को समीप में रखकर प्रक्षालित कर प्राशन करता है । सहस्त्रशीर्षा...इस अनुवाक से प्राशन कर आचमन करके ब्रह्मजज्ञानं प्रथमं...इस मन्त्र से अग्नि सम्बन्धि द्रव्यों को अग्नि में डालकर सं भा सिञ्चन्तु मरुतः आदि सक्षम एहि पर्यन्त मन्त्र के द्वारा स्वयं में सभी अग्नियों को समारोहित कर तत्पश्चात् अयं

ॐ"यदस्य पारे रजसः शुक्रं ज्योतिरजायत ।
तं नः पर्षदतिद्विषोऽअग्ने वैश्वानर स्वाहा ॥" इति मन्त्रेण शिक्यं धारयेत् ।

ततः त्रिदण्डादिकं धारयित्वा जलाशयसमीपम् उपगम्य स्नात्वा पितृन् तर्पयित्वा अष्टोत्तरसहस्त्रमूलमन्त्रं जपेत् । तत्र मन्त्राः-"ॐउदुत्यं जातवेदसंदेवं ते योनिऋत्विजो इस मन्त्र को पढकर अग्नि को सूंघे । "एष हवा अग्नेर्योनिर्यः...इस मन्त्र को पढकर गाँव से अग्नि लाकर पूर्ववत् अग्नि को सूंघे । यदि कथञ्चित् अग्नि उपलब्ध न हो सके तो जल में हवन करदे । एवं "आपो वै सर्वादेवता ...इन मन्त्रों को पढकर जल में से हवनीय द्रव्य एवं घी को निकालकर थोडा सा हविष्य भोजन करें । वेद में मोक्ष मन्त्र इसीप्रकार है ऐसा जावालोपनिषद् में कहा गया है । यही मोक्ष मन्त्र वेद का है यही उच्चारण करें ।

तत्पश्चात् पूर्वाश्रम के यज्ञोपवीत को हाथ में रखकर जल से आप्लावित कर वेदान्त विज्ञान सुनिश्चितार्थाः इत्यादि सम्पूर्ण मन्त्र को पढकर उस यज्ञोपवीत का परित्याग कर फिर संन्यासी एवं ब्रह्मचारी का एक-एक यज्ञोपवीत होता है । इस सिद्धान्त का अनुसरणकर एक सफेद यज्ञोपवीत को विधि के अनुसार धारण करें । श्वेत यज्ञोपवीत के विषय में कहा गया है कि संन्यासियों के सफेद दाँत होते हैं सफेद नख, श्रीदण्ड मुद्रा सफेद, यज्ञोपवीत सफेद, एवं त्रिदण्ड का वस्त्र सफेद इसप्रकार पाँच वस्तु सफेद कहे गये हैं ।

इसके वाद आचार्य गुरु परब्रह्म स्वरूप साकेताधिनायक श्रीरामचन्द्रजी के स्वरूप का ध्यान करके अपने दोनों चरणों को पकडे हुए जो ॐआप्यायन्तु ममाङ्गानि...आदि मन्त्र को पढरहा है, उसे पकडकर ब्रह्मतारक श्रीराममन्त्र को मन ही मन बारह-वार उच्चारण करके तथा उस श्रीराममन्त्र से ही जलको अभिमन्त्रित कर एवं शिष्य को अभिषिक्त करके आगे कहा जानेवाला ॐशंनो मित्रः शंवरुणः इत्यादि मन्त्रों को ॐशान्तिः शान्तिः...पर्यन्त आचार्य पढें ।

इसप्रकार शान्तिपाठ करलेने के पश्चात् गुरु शिष्य के शीर पर दाहिना हाथ रखकर पुरुषसूक्त को पढकर मम व्रते हृदयं ते दधामि यह उच्चारण करके उत्तर दिशा की ओर मुंह करके शिष्य के दाहिना कान में प्रणव आदि मन्त्रों का उपदेश करके उसका अभिप्राय शिष्य को समझावें । तत्पश्चात् गुरु समस्त जनता के अभिमत अपनी सम्प्रदाय परम्परा के अनुसार शिष्य का नामकरण करे वह नाम भगवान् के नामसे

वहन्ति केतवः दृशे विश्वाय सूर्य्यम् ॥" "ॐचित्रं देवानामुदगादनीकश्च क्षुर्मित्रस्य वरुणस्याग्नेः । आप्राद्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा ।" ॐतच्चक्षुर्देवहितम् पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेमशरदः शतं श्रृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ।" "ॐहंशः शुचिषद्वसुरन्तरिक्ष सद्धोतो वेदिषदतिथिर्दुरोणसत् । नृषद्वरसद्वतसद्व्योम सदब्जा गोजा ऋतजा सम्बद्ध हो यह प्रयास करें। नामकरण करलेने के पश्चात् उसी नामसे अपने संन्यस्त शिष्य को उसी नामसे आह्वान करें ।

तत्पश्चात् शिष्य भगवान् श्रीरामचन्द्रजी को मन ही मन ध्यान करके प्रैषोक्ति को "मन्द, मध्य, एवं तार, स्वर से क्रमशः उच्चारण करें। ॐभूर्भुवः स्वः संन्यस्तं मया इस मन्त्र को तीनवार मन्द मध्य, तथा उच्च स्वर से वोले तथा पुत्रेषणा वित्ते षणा, एवं लोकेषणा और सर्वभूतों से मैं व्युत्थित हो गया हूँ। मुझसे संसार के समस्त प्राणियों को अभय दान है, यह कहकर हाथ जोडकर पूर्वाभिमुख अथवा उत्तराभिमुख होकर श्रीराम स्मरण करके अपने अधिकार के अनुसार त्रिदण्ड आदि एवं वस्त्र आदि धारण करें । और तत्पश्चात् भगवान् की प्रार्थना करें । ब्राह्मण जलाञ्जलि देकर भक्तिपूर्वक भगवान् श्रीरामजी की प्रार्थना करें। सर्वदेव स्वरूप जलमें "मैं जल की आहुति भगंवान् विष्णु को देता हूँ" संसार की समस्त इच्छाओं को परित्याग करता हूँ। सव परित्याग कर मैं आपके शरण में आ गया हूँ। हे सर्व लोकशरण अव इस संसार में मेरा कोई सहारा नहीं है। हे जगन्नाथ मुझसे सर्व त्याग रूप संन्यास ग्रहण करलिया गया है। हे मधुसूदन आप मेरा संरक्षण करें। हे सर्वदेवेश रघुनाथ जगद्योनि पुण्डरीकाक्ष मैं समस्त प्राणियों के लिये अपने से अभय दान देकर हे परमेश्वर आपके शरणागत हुआ हूँ। हे पुरुषोत्तम मुझ शरणागत की आप रक्षा करें।

इसप्रकार संन्यास ग्रहण के सम्बन्ध में यमस्मृति में कहा गया है । तदनुसार आगे कहे जानेवाले उन-उन मन्त्रों से दण्ड आदि संन्यासी के अनुरूप साधनों को धारण करें। "इन्द्रस्य वज्रोऽसि"...इस मन्त्र को पढकर संन्यासी अपने दाहिना हाथ में त्रिदण्ड को धारण करें। ॐभूः ॐभूवः आदि सात व्याहृति मन्त्रों को ओंकार के साथ उच्चारण करके कमण्डलु को धारण करें। ॐयुवा सुवासाः परिवीत...इस

अद्रिजा ऋतं बृहत्" इति मन्त्रमुच्चार्य स्नात्वा । ॐआपो हिष्ठामयोभुवस्तान ऊर्जेदधातन, महेरणाय चक्षसे, यो वः शिव तमो रसः, तस्य भाजयते हनः, उशतीरिव मातरः, तस्मा अरंगमामव, यस्यक्षयाय जिन्वथ, आपो जन यथा च नः । इति मन्त्रैः मार्जयित्वा, अष्टोत्तरशतकृत्वः अधमर्षणं प्राणायामं च विधाय, सूर्योपस्थानान्तरं, अङ्गन्यासपूर्वकमष्टोत्तरसहस्तं मूलमन्त्रं जपेत् । एवमेव यथा सम्प्रदायं नियमान् पालयेत् ।

इतिआनन्दभाष्यसिंहासनासीनस्य जगद्गुरु श्रीरामानन्दाचार्य श्रीरामेश्व रानन्दाचार्यस्य कृतौ श्रीवैष्णवसंन्यासमीमांसायां, श्रीवैष्णवसंन्यासे त्रिदण्ड धारणविधिः परिपूर्णः ॥१७॥

मन्त्र को उच्चारित करके कौपीन काषाय वस्त्र आदि बाह्य वस्त्रों को धारण करें। इसी विषय वस्तु को बोधायन स्मृति में कहा गया है कि इसके वाद दण्ड धारण करता है "सखा मां गोपाय"...इस मन्त्र से । और मैत्रायणी स्मृति में कहते हैं कि इन्द्रस्य वज्रोऽसि...आदि से बाँस से बना हुआ त्रिदण्डों को दाहिना हाथ में धारण करें। परित्यज्य सर्वं व्रजति इति परिव्राट् तस्य भाव कर्म वा पारिव्राज्यम् इस व्युत्पत्ति के अनुसार संन्यास ग्रहण करलेने के पश्चात् समस्त सगे सम्बन्धियों का परित्याग करदें । येन देवाः पवित्रेण...इस मन्त्र के द्वारा पवित्री को धारण करें तथा यदस्य पारेरजसः ...इस मन्त्र के द्वारा शिक्य को धारण करें। तत्पश्चात् संन्यास के अनुरूप त्रिदण्ड आदि समस्त साधनों को धारण करके जलाशय के आस-पास में जाकर स्नान करके पितरों का तर्पण करके १००८ मूलमन्त्र का जप करें। स्नानादि करने के लिये अधोनिर्दिष्ट मन्त्र हैं ।

चित्रं देवानामुदणात्...इस मन्त्र से प्रारम्भ कर गोजा ऋतजा अदृजा ऋतं वृहत्पर्यन्त समस्त मन्त्रों का उच्चारण कर स्नान करके ॐआपोहिष्ठा मयो भुवः आदि तीन ऋचाओं को पढकर उक्त मन्त्र से मार्जन करके १०८ अघमर्षण जप एवं प्राणायाम करके सूर्योपस्थान के वाद अङ्ग न्यास पूर्वक १००८ मूलमन्त्र जपें । इसीप्रकार अपने सम्प्रदाय के अनुरूप नियमों का पालन करें ॥१७॥

इसप्रकार आनन्दभाष्यसिंहासनासीन जगद्गुरु श्रीरामानन्दाचार्यश्रीरामेश्वरानन्दा चार्यजी की कृति श्रीवैष्णव संन्यास मीमांसा में श्रीवैष्णव संन्यास एवं त्रिदण्ड धारण विधि परिपूर्ण हुआ ।

卐 ॐ 卐

☫ श्रीचरणपादुकापूजनम् ☫

श्रीवैष्णवश्रीरामानन्दीयपरम्परायामेवं विधः पारम्परिको व्यवहारो वर्तते यत्, मन्त्रे मन्त्रप्रदे गुरौ समभीष्टेदेवे चैक्यं भावयेत् । त्रयाणामपि तुल्यं माहात्म्यं न तु वैषम्यम्, तदुक्तम्-

नमो गुरुभ्यो गुरुपादुकाभ्यो, नमः परेभ्यः परपादुकाभ्यः ।
आचार्यसिद्धेश्वरपादुकाभ्यो, नमोस्तु सीतापति पादुकाभ्यः ॥

सिद्धान्तमिमनुसृत्य यथैव सकललोकाधिनाथस्य परब्रह्मस्वरूपिणो भगवतः श्रीरामचन्द्रस्य चरणपादुका यजनेन यावान् पुण्यराशिरूपचीयेत, तावानेव सपरिकरानन्दभाष्यकारश्रीचरणश्रीमतो मन्त्रप्रदस्य च गुरोः श्रीच-

☫ श्रीचरण पादुका पूजन विधि ☫

श्रीवैष्णव श्रीरामानन्दीय परम्परा में इस तरह का परम्परागत व्यवहार है जो गुरु परम्परा क्रम से व्यवहार परिपाटि देखने में आता है कि-गुरु महाराज द्वारा प्रदत्त ब्रह्म तारक षडक्षर श्रीराममहामन्त्र, एवं पञ्चसंस्कार करने के साम्प्रदायिक नियम परिपालन पूर्वक मन्त्र प्रदान करनेवाले गुरु महाराज एवं उपास्य देव के रूपमें अभीष्ट सर्वेश्वर श्रीरामचन्द्रजी इन तीनों में एक रूपता की भावना करें। मन्त्र, मन्त्र प्रदाता एवं अभीष्ट देव इन तीनों का ही महात्म्य समान है । किसी में भी न्यूनाधिक्य नहीं है । अतः तीनों में प्रभावगत विषमता नहीं है । यही वात कर्मकाण्ड प्रकरण में कही जाती है- परमपूजनीय गुरुजी महाराज को प्रणाम है । एवं गुरुजी के श्रीचरण पादुका को प्रणाम, परम गुरु तथा परात्पर गुरु महाराज को प्रणाम है । और उन गुरुओं की चरणपादुकाओं को भी प्रणाम है । आचार्य एवं सिद्धराजों के चरणपादुकाओं को प्रणाम है, तथा श्रीसीतानाथ श्रीमर्यादापुरुषोत्तम परब्रह्म परमेश्वर श्रीरामचन्द्रजी की श्रीचरणपादुकाओं को मेरा प्रणाम है ।

इस सिद्धान्त का अनुसरण करके जिस तरह निखिल ब्रह्माण्ड गत सभी लोकों के अधिनायक परब्रह्म स्वरूप साकेतलोकाधीश श्रीरामचन्द्रजी की चरणपादुका की पूजा करने से जितनी पुण्य राशि संग्रहीत होती है श्रीरामावतार आनन्दभाष्यकार जगद्गुरु श्रीरामानन्दाचार्यजी का परिकर-बारह प्रधान शिष्यों के साथ पूजन करने

रणपादुकापूजनेन पुण्योपचयो भवति । तस्मात् श्रीचरणपादुकायाः पूजन स्य विधिरवश्यमेव निरूपणीयतामेति । तत्र शास्त्रेषु पूजनस्य वहवः प्रकारा दरीदृश्यन्ते । यथा पञ्चोपचारः, षोडशोपचारः, त्रिंशोपचारः, राजोपचारः, मान सोपचारश्चेति । उपचारेष्वेतेषु षोडशोपचारस्य प्राधान्यमस्ति तथैवानन्दभाष्य कारश्रीचरणनिर्देशात् तस्मात् श्रीचरणपादुकायाः षोडशोपचारात्मिका पूजाविधिरुच्यते, तत्र श्रीपादचिह्ने श्रीचरणपादुकायां वा नाकृतिमात्रत्वमपि तु तत्र अधिदेवत्वमस्ति। तस्माद्ध्यानावाहनादयः सम्भवन्ति।तत्र षोडशोपचाराः→

आवाहनासनाभ्यां च पादाद्याचमनैस्तथा ।
स्नानवस्त्रोपवीतैश्च गन्धपुष्पसुधूपकैः ॥
दीपनैवेद्यताम्बूलप्रदक्षिणविसर्जनैः ।
षोडशर्चाप्रकारैस्तमेतैरर्चेत् सदा सुधीः ॥१८॥

श्रयन्ति देवा मुनयश्च नित्यं यं रामचन्द्रं करुणासमुद्रम् ।
तस्मै तुलस्या परिपूरितानि पुष्पाणि मालोल्लसितानि पद्मः ॥

ॐभूर्भुवः स्वः सशक्तिक श्रीरामचन्द्राय नमः पुष्पाणि समर्पयामि ।

॥ धूपः ॥

हरिः ॐ ब्राह्मणोऽस्य मुखमासीद्बाहूराजन्यः कृतः ।
ऊरूतदस्य यद्वैश्यः पद्भ्याँ शूद्रो अजायत ॥
मैथिलो जनको राजा सुतां यस्मै ददौ मुदा ।
तस्मै ददामि रामाय धूपं गन्धयुतं मुदा ॥
ॐभूर्भुवः स्वः सशक्तिक श्रीरामाय नमः धूपं समर्पयामि ।

॥ दीपः ॥

हरिः ॐ चन्द्रमामनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्चमुखादग्निरजायत ॥
सौमित्रियुक्तैर्नगरीं समेत्य लङ्कां दशास्यो निहतोरणे यैः ।
तेभ्यो नमस्कृत्य ददामि दीपं तमोपहं तद्ग्रहणं कुरुध्वम् ॥
ॐभूर्भुवः स्वः सशक्तिक श्रीरामचन्द्राय नमः दीपं समर्पयामि ।

॥ नैवेद्यम् ॥

हरिः ॐ नाभ्या आसीदन्तरिक्षँशीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथालोकाँ २ अकल्पयन् ॥
वृक्षेभ्य आहृत्य फलैः समेतं मिष्टान्नयुक्तं बहुलं रसाढ्यम् ।
नैवेद्यमत्रापि गृहाण नाथ ? सीतापते ? राम ? नमोनमस्ते ॥
ॐभूर्भुवः स्वः सशक्तिक श्रीरामचन्द्राय नमः नैवेद्यं समर्पयामि ।

॥ ताम्बूलम् ॥

हरिः ॐ यत्पुरुषेण हविषा देवा यद्यज्ञमतन्वत ।
वसन्तोस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥
एलादिकर्पूरयुतं रसाढ्यं सुस्वादुसौगन्धसमन्वितं च ।
ताम्बूलमानन्दकरं गृहाण दत्तं मया राम ? मुनीन्द्रपूज्य ? ॥
ॐभूर्भुवः स्वः सशक्तिक श्रीरामचन्द्राय नमः ताम्बूलं समर्पयामि ।

॥ दक्षिणा ॥

हरिः ॐ सप्तास्यासन् परिधयस्त्रिः सप्तसमिधः कृताः ।
देवा यद्यज्ञन्तन्वाना अवध्नन् परुषं पशुम् ॥

सीतापते ? रघुपते ? शुभदक्षिणेयं दत्तामया सकलकर्म समाप्तियोगे ।
तां त्वं गृहाण मुदितोभवमुक्तिदायिन् ? मुक्ता भवन्ति सुजनाः कृपया तवैव ॥

ॐभूर्भुवः स्वः सशक्तिक श्रीरामचन्द्राय नमः दक्षिणां समर्पयामि ।

♆ पुष्पाञ्जलिः ♆

हरिः ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
तेह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥
पुष्पाञ्जलिं निखिलकर्मसमाप्तिकर्मः तुभ्यं ददामि रघुपुङ्गव ? दीनबन्धो ? ।
सीतापते ? भरतपूर्वज ? तं गृहाण विश्राममत्र करवाणि नमोनमस्ते ॥

ॐभूर्भुवः स्वः सशक्तिक श्रीरामचन्द्राय नमः पुष्पाञ्जलिं समर्पयामि ।

♆ आवरणपूजा ♆

ॐसंविन्मयः परो देवः परामृतरसप्रियः ।
अनुज्ञां देहि मे राम ? परिवारार्चनाय ते ॥

इस मन्त्र से पुष्पाञ्जलि समर्पित कर सर्वेश्वर श्रीरामजी से उनके परिवार पूजन हेतु आज्ञा प्राप्तकर प्रथमावरणादि क्रम से पूजा करे-

♆ प्रथमावरणम् ♆

यन्त्र में दर्शित अङ्क क्रमानुसार १-सर्वेश्वर श्रीरामजी के वाम भाग में **ॐसर्वेश्वरी श्रीसीतायै नमः**, ॐश्रीसीतायाः पादुकां सर्वोपचारैः पूजयामि नमस्करोमि २-अग्निकोण में **ॐशाङ्‌र्गाय नमः**, सर्वोपचारैः श्रीशार्ङ्गं पूजयामि नमस्करोमि ३-दक्षिण पार्श्व में **ॐशराय नमः**, सर्वोपचारैः श्रीशरं पूजयामि नमस्करोमि । ४-वामभाग में **ॐतूणीराय नमः**, सर्वोपचारैः श्रीतूणीरं पूजयामि नमस्करोमि ।

ॐअभीष्टसिद्धिं मे देहि शरणागतवत्सल ? ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

♆ द्वितीयावरणम् ♆

षट् कोण केसर के अग्नि कोण में **५-ॐरां हृदयाय नमः** । नैऋत्ये **६-ॐरीं शिरसे स्वाहा** । वायव्ये **७-ॐरूं शिखायै वषट्** । ऐशान्ये **८-ॐरैं कवचाय हुम्** । पूज्य तथा पूज के मध्य में **९-ॐरौं नेत्राभ्यां वौषट्** । श्रीरामजी के पश्चिम में **१०-ॐरः अस्त्राय फट्** ।

ॐअभीष्टसिद्धिं मे देहि शरणागतवत्सल ? ।

भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥

☫ तृतीयावरणम् ☫

षट् कोण केसर के बाहर अष्टदल में श्रीरामजी एवं पूजक के बीच पूर्व दिशा की कल्पना कर पूर्वादि क्रम से **११-ॐश्रीहनुमते नमः** श्रीहनुमन्तं सर्वोपचारैः पूजयामि नमस्करोमि । **१२-ॐश्रीसुग्रीवाय नमः** श्रीसुग्रीवं सर्वोपचारैः पूजयामि नमस्करोमि । **१३-ॐश्रीभरताय नमः** श्रीभरतं सर्वोपचारैः पूजयामि नमस्करोमि । **१४-ॐश्रीविभीषणाय नमः** श्रीविभीषणं सर्वोचारैः पूजयामि नमस्करोमि **१५-ॐ श्रीलक्ष्मणाय नमः** श्रीलक्ष्मणं सर्वोपचारैः पूजयामि नमस्करोमि । **१६-ॐश्रीअङ्गदाय नमः** श्रीअङ्गदं सर्वोपचारैः पूजयामि नमस्करोमि । **१७-ॐश्रीशत्रुघ्नाय नमः** श्रीशत्रुघ्नं सर्वोपचारैः पूजयामि नमस्करोमि । **१८-ॐश्रीजाम्बवते नमः** श्रीजाम्बवन्तं सर्वोपचारैः पूजयामि नमस्करोमि ।

ॐअभीष्टसिद्धिं मे देहि शरणागतवत्सल ? ।

भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥

☫ चतुर्थावरणम् ☫

अष्टदल के अग्रभाग में **१९-ॐश्रीस्त्रष्ट्रे नमः** श्रीस्त्रष्टारं सर्वोपचारैः पूजयामि नमस्करोमि । **२०-ॐश्रीजयन्ताय नमः** श्रीजयन्तं सर्वोपचारैः पूजयामि नमस्करोमि । **२१-ॐश्रीविजयाय नमः** श्रीविजयं सर्वोपचारैः पूजयामि नमस्करोमि । **२२-ॐश्री सुराष्ट्राय नमः** श्रीसुराष्ट्रं सर्वोपचारैः पूजयामि नमस्करोमि । **२३-ॐश्रीराष्ट्रवर्धनाय नमः** श्रीराष्ट्रवर्धनं सर्वोपचारैः पूजयामि नमस्करोमि । **२४-ॐश्रीअकोपाय नमः** श्रीअकोपं सर्वोपचारैः पूजयामि नमस्करोमि । **२५-ॐश्रीधर्मपालाय नमः** श्रीधर्म पालं सर्वोपचारैः पूजयामि नमस्करोमि । **२६-ॐश्रीसुमन्ताय नमः** श्रीसुमन्तं सर्वोपचारैः पूजयामि नमस्करोमि ।

ॐअभीष्टसिद्धिं मे देहि शरणागतवत्सल ? ।

भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ॥

☫ पञ्चमावरणम् ☫

अनन्तर भूपुर में पूर्वादि क्रमसे **२७-ॐलं श्रीइन्द्राय नमः** श्रीइन्द्रं सर्वोपचारैः

पूजयामि नमस्करोमि । **२८-ॐरं श्रीअग्नये नमः** श्रीअग्निं सर्वोपचारैः पूजयामि नमस्करोमि । **२९-ॐमं श्रीययाय नमः** श्रीयमं सर्वोपचारैः पूजयामि नमस्करोमि । **३०-ॐक्षं श्रीनिर्ऋतये नमः** श्रीनिर्ऋतिं सर्वोपचारैः पूजयामि नमस्करोमि । **३१-ॐवं श्रीवरुणाय नमः** श्रीवरुणं सर्वोपचारैः पूजयामि नमस्करोमि । **३२-ॐवं श्रीवायवे नमः** श्रीवायुं सर्वोपचारैः पूजयामि नमस्करोमि । **३३-ॐकुं श्रीकुवेराय नमः** श्रीकुवेरं सर्वोपचारैः पूजयामि नमस्करोमि । **३४-ॐहं श्रीईशानाय नमः** श्रीईशानं सर्वोपचारैः पूजयामि नमस्करोमि । इन्द्रेशानयोर्मध्ये **३५-ॐआं श्रीब्रह्मणे नमः** श्रीब्रह्माणं सर्वोपचारैः पूजयामि नमस्करोमि । वरुणनिऋतियोर्मध्ये **३६-ॐह्रीं श्रीअनन्ताय नमः** श्रीअनन्तं सर्वोपचारैः पूजयामि नमस्करोमि ।

ॐअभीष्टसिद्धिं मे देहि शरणागतवत्सल ? ।

भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ॥

❀ षष्ठावरणम् ❀

भू पुर के बाहर पूर्वादि क्रम से **३७-ॐवं श्रीव्रजाय नमः** श्रीव्रजं सर्वोपचारैः पूजयामि नमस्करोमि । **३८-ॐशं श्रीशक्तये नमः** श्रीशक्तिं सर्वोपचारैः पूजयामि नमस्करोमि । **३९-ॐदं श्रीदण्डाय नमः** श्रीदण्डं सर्वोपचारैः पूजयामि नमस्करोमि । **४०-ॐखं श्रीखड्ग्राय नमः** श्रीखड्गं सर्वोपचारैः पूजयामि नमस्करोमि । **४१-ॐपं श्रीपाशाय नमः** श्रीपाशं सर्वोपचारैः पूजयामि नमस्करोमि । **४२-ॐअं श्रीअंकुशाय नमः** श्रीअंकुशं सर्वोपचारैः पूजयामि नमस्करोमि । **४३-ॐगं श्रीगदायै नमः** श्रीगदां सर्वोपचारैः पूजयामि नमस्करोमि । **४४-ॐत्रिं श्रीत्रिशूलाय नमः** श्रीत्रिशूलं सर्वोपचारैः पूजयामि नमस्करोमि । **४५-ॐपं श्रीपद्माय नमः** श्रीपद्मं सर्वोपचारैः पूजयामि नमस्करोमि । **४६-ॐचं श्रीचक्राय नमः** श्रीचक्रं सर्वोपचारैः पूजयामि नमस्करोमि ।

ॐअभीष्टसिद्धिं मे देहि शरणागतवत्सल ? ।

भक्त्या समर्पये तुभ्यं श्रीषष्ठावरणार्चनम् ॥

❀ प्रार्थना ❀

जगत्पते ? श्रीश ? जगन्निवास ? प्रभो ? जगत्कारण ? रामचन्द्र ? ।
नमोनमः कारुणिकाय तुभ्यं पादाब्जयुगमे तव भक्तिरस्तु ॥१॥
मनो मिलिन्दस्तव पादपङ्कजे रमार्चिते संरमतां भवे भवे ।

यशः श्रुतौ ते मम कर्णयुग्मकं त्वद्भक्तसङ्गोऽस्तु सदा मम प्रभो ? ॥२॥
श्रीरामचन्द्रचरणौ मनसा स्मरामि श्रीरामचन्द्रचरणौ वचसा गृणामि ।
श्रीरामचन्द्रचरणौ शिरसा नमामि श्रीरामचन्द्रचरणौ शरणं प्रपद्ये ॥३॥

ॐ दण्डवत्प्रणाम ॐ

संसारसागरान्नाथौ पुत्रमित्रग्रहाकुलात् ।
गोप्तारौ मे दयासिन्धू प्रपन्नभयभञ्जनौ ॥

योऽहं ममास्ति यत्किञ्चिदिह लोके परत्र च ।
तत्सर्वं भवतोरेव चरणेषु समर्पितम् ॥

अहमस्म्यपराधानामालयस्त्यक्तसाधनः ।
अगतिश्च ततो नाथौ भवन्तावेव मे गतिः ॥

तवास्मि जानकीकान्त ? कर्मणा मनसा गिरा ।
रामकान्ते ? तवैवास्मि युवामेव गती मम ॥

शरणं वां प्रपन्नोऽस्मि करुणानिकराकरौ ।
प्रसादं कुरुतां दासे मयि दुष्टेऽपराधिनि ॥

मत्समोनास्ति पापात्मा त्वत्समोनास्ति पापहा ।
इति सञ्चित्य देवेश ? यथेच्छसि तथा कुरु ॥

अन्यथा हि गतिर्नास्ति भवन्तौ हि गतिर्मम ।
तस्मात्कारुण्यभावेन कृपां कुरु कृपानिधे ? ॥

दासोऽहं शेषभूतोऽहं तवैव शरणं गतः ।
पराधितोऽहं दीनोऽहं पाहि मां करुणाकर ? ॥

इसप्रकार मधुर वाणी सुस्वर मे वोलते हुये संस्थापित सर्वेश्वर श्रीरामचन्द्रजी को सादर दण्डवत् प्रणाम करे ॥२२॥

卐 सन्ध्योपासनम् 卐

सन्ध्योपासनं द्विजानं सर्वेषामाश्रमिणां चात्यावश्यकं कर्म इति शास्त्रेषु

ॐ सन्ध्योपासन ॐ

ब्राह्मण क्षत्रिय एवं वैश्य तथा सभी आश्रमों में निवास करनेवालों के लिये

निश्चितम्। सन्ध्या हीनानां कुत्रापि वैदिकेषु कर्मसु नाधिकार इति तन्निरूप्यते। तदुक्तम् दक्षस्मृतौ-

सन्ध्यां नोपासते यस्तु ब्राह्मणो हि विशेषतः।
स जीवन्तेव शूद्रः स्यान् मृतः श्वाश्चैव जायते॥
सन्ध्याहीनोऽशुचिर्नित्यमनर्हसर्वकर्मसु।
यदन्यत् कुरुते कर्म न तस्य फलभाग् भवेत्॥
पूर्वां सन्ध्यां सनक्षत्राम् उपासीत यथाविधि।
गायत्रीमभ्यसेत्तावत् यावदादित्यदर्शनम्॥
उपास्य पश्चिमां सन्ध्यां सादित्यां च यथा विधि।
गायत्रीमभ्यसेत्तावद् यावदादित्यदर्शनम्॥

ᛘ संक्षिप्तसन्ध्योपासनविधिः ᛘ

ॐअपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेतपुण्डरीकाक्षं सवाह्याभ्यन्तः शुचिः॥

सन्ध्योपासन करना अत्यावश्यक कर्तव्य है। ऐसा शास्त्रों में सिद्धान्त रूप में निश्चित किया गया है। सन्ध्या कर्म से विहीन द्विजों का किन्हीं भी वैदिक कर्मों में अधिकार नहीं है ऐसा वेद प्रमाणित धर्म शास्त्रों द्वारा प्रतिपादन किया जाता है। जो ब्रह्मण विशेष रूपसे सन्ध्योपासन कर्म का सम्पादन विधिवत् नहीं करता है। वह अपने जीवन काल में ही शूद्रत्व को प्राप्त करता है। इस भौतिक शरीर को परित्याग करने के वाद कुक्कुर योनि को प्राप्त करता है। सन्ध्योपासन कर्म से विहीन द्विजाति सदैव अशुचिता को प्राप्त रहता है, एवं समस्त वैदिक कर्मों के अयोग्य हो जाता है। अर्थात् विना सन्ध्योपासन के किसी भी वैदिक कर्म में अधिकार नहीं है, उस कर्म का वह फल भागी नहीं होता है। जिस काल में आकाश में तारे चिम चिमाते ही रहें, उस समय में प्रातःकालीन सन्ध्योपासन करना चाहिये। वह शास्त्रीय विधान के अनुसार करना चाहिये, तब तक गायत्री का अभ्यास करना चाहिये जबतक कि भगवान् भास्कर का दर्शन न हो जाय। आकाश मण्डल में भगवान् सूर्य के रहते ही शास्त्रीय विधान के अनुसार सायं कालीन सन्ध्योपासन करके गायत्री का जप तबतक करना चाहिये जबतक सूर्य का दर्शन होता रहे।

इति मन्त्रेणात्मनः सर्वाङ्गे जलं सिञ्चेत् ।

ततो-भगवदाज्ञया श्रीरामकैङ्कर्यस्वरूपं सन्ध्यावन्दनं कर्माहमाचरिष्ये इति सङ्कल्प्य-

ॐअच्युताय नमः, ॐअनन्ताय नमः, ॐगोविन्दाय नमः, इति त्रिराचम्य, ॐरामचन्द्राय नमः इति हस्तौ प्रक्षाल्य, ॐरामाय नमः, ॐरामभद्राय नमः, ॐरामचन्द्राय नमः, ॐरघुनाथाय नमः, ॐजानकी वल्लभाय नमः, ॐविष्णवे नमः, ॐमधुसूदनाय नमः, ॐत्रिविक्रमाय नमः, ॐवामनाय नमः, ॐजगन्नाथाय नमः, इति द्वादशनामभिः करन्यासं अङ्गन्यासं च विधाय ।

ॐसूर्य्यश्चमा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् यद्रात्र्या पापमकार्षम्, मनसा वाचा हस्ताभ्याम् पद्भ्यामुदरेण शिश्ना रात्रिस्तदववलुम्पतु यत् किञ्चिद्दुरितं मयि, इदमहं माममृतयोनौ, सूर्य्ये ज्योतिषि जुहोमि स्वाहा ।

卐 अब संक्षिप्त सन्ध्योपासन विधि कहते हैं 卐

ॐ अपवित्रः पवित्रो वा...इस मन्त्र से अपना सभी अङ्ग जलसे अभिषिक्त कर तत्पश्चात् भगवान् श्रीरामजी के आदेश से उनका कैङ्कर्य स्वरूप सन्ध्यावन्दन कर्म मैं सम्पादन करुँगा । यह सङ्कल्प करके ॐअच्युताय नमः-आदि मन्त्रों से तीनवार आचमन करके ॐरामचन्द्राय नमः पढकर हाथों को प्रक्षालित कर ॐरामाय नमः से लेकर ॐजगन्नाथाय नमः तक बारह नाम मन्त्रों से करन्यास एवं अङ्गन्यास सम्पादन करके ॐसूर्यश्च मा मन्युश्च-इस मन्त्र से प्रातः कालीन सन्ध्या में आचमन करके पूर्व निर्देशानुसार करन्यास एवं अङ्गन्यास करे । तत्पश्चात् आपोहिष्ठामयोभुवः...इत्यादि सात मन्त्रों से शिर का अभिषेक कर आठवाँ मन्त्र से भूमि को अभिषिक्त करे । पुनः नवम मन्त्र से अपने शिर का अभिषेक करे । पुनः ॐद्रुपदादिव...इस मन्त्र से तीनवार अपने शिर का मार्जन करे । इसके वाद ॐऋतञ्च सत्यञ्चा...इस मन्त्र से दाहिना हाथ में विद्यमान जलसे नाक का संयोगकर श्वास छोडता हुआ तीनवार अथवा एक वार उपर्युक्त मन्त्र को पढें । एवं हाथ में विद्यमान जलको अपनी वायीं ओर भूमि पर फेंक देवें । पुनः अन्तश्चरसि भूतेषु...इत्यादि मन्त्र से आचमन करके मूलमन्त्र से प्राणायाम

इति मन्त्रेण प्रातः सन्ध्यायामाचम्य, यथा पूर्वम् करन्यासमङ्गन्यासञ्च कुर्यात् । तत आपोहिष्ठेत्यादिऋग्भिः सप्तभिः शिर अभिषिञ्चेत्, अष्टमेन भूमिं नवमेन च पुनः शिरोऽभिषिञ्चेत् ।

१-ॐआपोहिष्ठा मयोभुवः । (२) ॐतान ऊर्जे दधातन । (३) ॐमहेरणाय चक्षसे । (४) ॐयोवः शिवतमो रसः । (५) ॐतस्य भाज यतेहनः । (६) ॐउशतीरिव मातरः । (७) तस्मा अरं गमामवः । (८) ॐ यस्य क्षयायजिन्वथ । (९) ॐआपोजनयथा च नः ।
ॐद्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव ।
पूतं पवित्रेणवाज्यमापः शुन्धन्तु मैनसः ॥ इतिमन्त्रेण त्रिं शिरः प्रमार्जयेत् ।

ॐऋतञ्च सत्यञ्चाभीद्धान्तपसो द्यजायत । ततो रात्रिरजायत, ततः समुद्रो अर्णवः । समुद्रादर्णवादधि संवत्सरो अजायत । अहोरात्राणि विदध द्विश्वस्य मिषतोवशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथो स्वः । इति मन्त्रेण दक्षिणहस्तस्थितेन जलेन घ्राणं संयोज्य स्वासं मुञ्चन् त्रिं सकृद् वा पठेत् जपानन्तरं हस्तस्थितं जलं स्व वाम भागे भूमौ क्षिपेत् ।

कर ॐभूर्भुवः स्वः...इस गायत्री मन्त्र से भगवान् सूर्य को तीनवार अर्घ्य देकर देवताओं का तर्पण करे । देवताओं के तर्पण में पूर्व में तीर्थों का वर्णन किया जा चुका है तदनुसार देवतीर्थ से ॐरामं तर्पयामि बारह नामों के द्वारा जलसे बारह वार तर्पण करके भगवान् श्रीरामजी की प्रसन्नता के लिये उनका सेवन स्वरूप गायत्री जप मैं करुँगा इसप्रकार सङ्कल्प करके आचमन एवं प्राणायाम कर गायत्री का आवाहन करे । ॐआगच्छ वरदे देवि...इस मन्त्र से गायत्री का आवाहन कर ॐतेजोऽसि शुक्रमासि...तथा ॐगायत्र्यस्येकवदी...इन मन्त्रों से वेद माता गायत्री का उपस्थान कर अपने समय एवं सामर्थ्य के अनुसार गायत्री मन्त्र का जप करे । गायत्री जप करलेने के पश्चात् ॐविश्वात्मन् देवलोकेस्मि...इस मन्त्र से अपने अभीष्ट देव भगवान् श्रीरामजी को जप का समर्पण करे । भगवान् को जप निवेदन करलेने के पश्चात् उत्तरे शिखरे जाते...इस मन्त्र को पढकर वेद माता गायत्री का विसर्जन करे । तत्पश्चात् भगवान् श्रीरामजी की प्रसन्नता के लिये मैं सूर्योपस्थान करुँगा इसप्रकार संकल्प करके पूर्व

"ॐअन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः । त्वं यज्ञस्त्वं वषट् कारस्त्वमिन्द्रस्त्वं रुद्रस्त्वं विष्णुस्त्वं ब्रह्मत्वं प्रजापतिः त्वं तदाप आपोज्योती रसोऽमृतम् ब्रह्मभूर्भुवः सुवरोम् । इति मन्त्रेणाचम्य, मूलेन प्राणानायम्य

"ॐभूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियोयोनः प्रचोदयात्" इति मन्त्रेण सूर्याय त्रिः अर्घं दत्वा, देवान् तर्पयेत् ।

तत्र मन्त्राः १-ॐरामं तर्पयामि (२) ॐकेशवं तर्पयामि (३) ॐमाधवं तर्पयामि (४) ॐगोविन्दं तर्पयामि (५) ॐविष्णुं तर्पयामि, (६) ॐमधुसूदनं तर्पयामि (७) ॐत्रिविक्रमं तर्पयामि (८) ॐवामनं तर्पयामि (९) ॐश्रीधरं तर्पयामि (१०)ॐहृषीकेशं तर्पयामि (११) ॐपद्मनाभं तर्पयामि, (१२) ॐदामोदरं तर्पयामि, इति देवतीर्थेन जलेन द्वादशधा तर्पणं विधाय । ॐश्रीरामप्रीतिकाम गायत्रीजपं करिष्ये इति सङ्कल्पं कुर्यात्-आचम्य, प्राणानायम्य-

ॐआगच्छ वरदे देवित्र्यक्षरे ब्रह्मवादिनी ।
गायत्रि छन्दसां मातः इदं ब्रह्म जुषस्व मे ॥

इति आवाह्य "ॐतेजोऽसि शुक्रमस्यमृतमसि धामनामासि प्रियन्देवानामनाधृष्टं देवयजनमसि ॐगायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पदि नहिदद्यसे नमस्ते तुरीयाय दर्शिताय पदाय परो रजसे । एभिर्मन्त्रैरुपस्थाय यथाशक्तिगायत्री मन्त्रस्य जपं कुर्यात् ।

निर्दिष्ट मन्त्रों से तीनवार आचमन एवं मूलमन्त्र से प्राणायाम करके भगवान् सूर्य के अभिमुख होकर दोनों हाथों को जोडकर ॐउद्वयत् तमसः परि...से लेकर शतं भूयश्च शरदः शतात्...पर्यन्त निर्दिष्ट मन्त्रों के द्वारा भगवान् सूर्य का उपस्थान कर पुनः भगवान् श्रीरामजी को आकाशात् पतितं तोऽयं...इत्यादि मन्त्र से निवेदन करे । इसका भाव यह है कि जिस प्रकार आकाश से गिरा हुआ जल सर्वतोभावेन समुद्र में जाता है। उसीप्रकार जिस किसी देवता को किया गया नमस्कार भगवान् श्रीरामजी को जाता है । क्योंकि भगवान् श्रीरामजी सर्वदेवमय हैं इस वात को गीता में भी कहा गया है कि जो कोई प्राणी किसी देवता की उपासना करता है उन सभी उपासनाओं का परिणाम भगवान् के पास ही जाता है तथा उनसे ही उपासकों को फलोपलब्धि होती

ॐविश्वात्मन् देवलोकेश रामचन्द्र दयानिधे ।
गृहाणेमं जपं नाथ ? कृपया परया प्रभो ॥ इतिश्रीरामाय जपनिवेदनं कुर्यात् ।
ततः श्रीरामप्रीत्यर्थम् सूर्योपस्थानमहं करिष्ये इति सङ्कल्प्य, त्रिराचम्य प्राणानायम्य सूर्याभिमुखः, इमान् मन्त्रान् बद्धकरपुटः पठेत् ।

"ॐउद्वयन्तमसस्परि स्वः पश्यन्तमुत्तरम् ।
देवन्देवत्रा सूर्य्यमगन्मज्योतिरुत्तमम् ॥१॥

ॐउदुत्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्य्यम् ।

ॐचित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्ने आप्रा द्या वा पृथिवी अन्तरिक्षऽसूर्य आत्मा जगतस्तस्थुषश्च ।

ॐतच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं, जीवेम शरदः शतं, श्रृणुयाम शरदः शतं, प्रब्रवाम शरदः शतमदीनाः श्याम शरदः शतम्भूयश्च शरदः शतात् ।एभिः मन्त्रैः सूर्योपस्थानं विधाय-

आकाशात् पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेव नमस्कारः श्रीरामं प्रतिगच्छति ॥

इत्थं सन्ध्यावन्दनं परिसमाप्य श्रीरामं यथालब्धोपचारैः पूजयेत् ।

त्रिकालमेककालं वा पूजयेत् पुरुषोत्तमम् । कात्या.स्मृतिः। ततः प्रभुं
"उरसः शिरोदृष्टिमनोवचः पदद्वयप्राजत्करयुगमजानुभिः ।
अङ्गैः क्षितौ तं प्रणमेदथाष्टभिदीर्घं तथैतैः कृतधीश्च दण्डवत् ॥"

इत्याचार्योक्तदिशा दण्डवत् प्रणमेत्, ततो गुरूनन्याश्च पूज्यान् यथा श्रीसम्प्रदायं प्रणमेत् ।

है। इसप्रकार सन्ध्यावन्दन कर्म यथाविधि परिपूर्ण कर जितना भी पूजन का साधन उपलब्ध हो उन-उन उपचारों से भगवान् श्रीरामजी की श्रीसम्प्रदाय परम्परा के अनुसार पूजन करके प्रभु को दण्डवत् प्रणाम करे। तथा तत्पश्चात् अपने गुरु एवं अन्य पूजनीय लोगों को प्रणाम करें ।

मध्याहन कालीन सन्ध्या एवं सायं कालीन सन्ध्या में केवल आचमन मन्त्र भिन्न है। अन्य सव कुछ नियम पूर्ववत् है। मध्याह्न काल में ॐ आपः पुनन्तु

मध्याह्नसन्ध्यायामाचनमन्त्रः पृथक् सायं सन्ध्यायामपि पृथगन्यत् तुल्यम्। मध्याह्ने-आचमनमन्त्रः-ॐआपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् । यदुच्छिष्टमभोज्यञ्च यद्वादुश्चरितं मम । सर्वं पुनन्तु मामापः असताञ्च प्रतिग्रहᳬस्वाहा ।

सायं सन्ध्यायान्तु-ॐअग्निश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां, यदह्ना पापमकार्षम् मनसा वाचा पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु यत् किञ्चिद् दुरितम्मयि इदमहमां सत्ये योनौ जुहोमि स्वाहा ॥२३॥

ॐ कालक्षेपः ॐ

कार्योमहात्मभिर्नित्यं कालक्षेपो मुमुक्षुभिः ।
परमात्मपरैरित्थं वैष्णवैरिति वर्ण्यते ॥१॥

प्रातर्मध्याह्नसायं कृतशुचिकृतिभिः राममभ्यर्च्य सम्यक्
श्रीमद्रामायणेन प्रतिदिनमखिलैर्भारतेन प्रपन्नैः ।

शक्तैरानन्दभाष्यैरथ च शुभतमाचार्यदिव्यप्रबन्धैः
कालक्षेपो विधेयः सुविजितकरणैः स्वाकृतेर्यावदन्तम् ॥२॥

पृथिवीं...इत्यादि मन्त्र से आचमन करे। एवं सायं कालीन सन्ध्या में ॐअग्निश्च मामन्युश्च...इस मन्त्र से आचमन करे। शेष पूर्ववत् ॥२३॥

卐 कालक्षेप 卐

अथ महाभागवत श्रीवैष्णवों का लक्षण स्वरूप और महात्म्य कथन के अनन्तर यथोक्त महात्मा किस तरह से समय यापन करे ? इसवात को बतलाने के लिये कहते हैं-"कार्योमहात्मभिः" इत्यादि । हे सुरसुरानन्द ? सर्वदा परमात्मा श्रीरामजी की सेवा में तत्पर सायुज्य मोक्ष चाहनेवाले महात्मा श्रीवैष्णवगण इसतरह अर्थात् वक्ष्यमाण प्रकार से कालक्षेप अर्थात् काल यापन करें। वह प्रकार मैं तुमको कहता हूँ सावधान होकर के सुनो ॥१॥

बाह्याभ्यन्तर इन्द्रिय के ऊपर जय रखनेवाला तथा वेदशास्त्र के ज्ञान से और शारीरिक वल सम्पन्न शरणागत श्रीव्रैष्णव प्रातःकाल मध्याह्नकाल और सायं काल में शौच स्नानादि नित्य क्रिया से निवृत्त होकर प्रतिदिन सवक्षर श्रीरामचन्द्रजी का

स्नानादिकर्माणि विधाय नित्यं ग्रन्थानमून् संश्रृणुयादशक्तः ।
श्रीरामसन्नाम सुकीर्तनं च द्वयानुसन्धानमथो विदध्यात् ॥३॥
दिव्येषु देशेषु सतां प्रसङ्गं तदीयकैङ्कर्यपरायणः सन् ।
यावच्छरीरान्तमहर्दिवं तत्कथामुदारां श्रृणुयाद्भवघ्नीम् ॥४॥

षोडशोपचार के द्वारा पूजन करके श्रीमद्रामायण महाभारत गीता भागवतादि ग्रन्थों का तथा प्रस्थानत्रयानन्दभाष्य और पूर्वाचार्य श्रीपुरुषोत्तमाचार्य प्रभृतिक महामुनि निर्मित दिव्य स्तोत्रादि के पाठ पारायण द्वारा यावत् जीवन समय का क्षेप करें ॥२॥

यदि भागवत श्रीवैष्णव शरीर के वृद्धत्व अथवा रोगादि कारणों से श्रीमद्रामायण भागवत आनन्दभाष्यादिक ग्रन्थरत्नों का स्वयं पारायण करने में अशक्त हो जाय तो विद्वान् श्रीवैष्णवों के द्वारा उपर्युक्त ग्रन्थों का पारायण करा करके प्रतिदिन उन ग्रन्थों का श्रवण करें। नित्य स्नानादिक क्रिया करके विधिपूर्वक सर्वेश्वर श्रीरामजी का यथा मिलितोपचार से पूजन करके कथा का श्रवण करें। भगवान् की समीचीन कथाओं का कीर्तन करें। यदि स्वयं कीर्तन करने में भी अशक्त हो जाय अथवा पीठ मठ सम्बन्धि कार्यान्तर में अस्त व्यस्त रहें तो श्रीराम द्वयमन्त्र का जो अर्थ है उसका मनसे ही अनुसन्धान स्मरण करें। अर्थात् समर्थ श्रीवैष्णव पूजनादि करके यथाकाल में स्वयं इन ग्रन्थों का पारायण करें यह प्रथम विधि है। स्वयं पारायणाभाव में अन्य द्वारा पारायण करा के उसका श्रवण करें। तदभाव में भगवान् के नाम का कीर्तन करें तदभाव में द्वयादि विशिष्ट मन्त्रार्थ का मन से ही अनुचिन्तनकर काल यापन करें ॥३॥

सर्वेश्वर श्रीरामजी भागवत तथा आचार्य प्रभृतिक श्रीवैष्णवों के कैङ्कर्य सेवा में निष्ठा रखनेवाले तदीय सेवा श्रद्धाशील श्रीवैष्णवगण दिव्य प्रदेश-अयोध्याजी, चित्रकूट पञ्चवटी और जनकपुर प्रभृतिक भक्ति पोषक प्रदेशों में जीवन पर्यन्त अर्थात् यावत्पर्यन्त इस पाँच भौतिक नश्वर शरीर का पतन न हो तावत् इन प्रदेशों में निवास करते हुये तथा चिदचिदीश्वर रूप प्रधान तत्वत्रय के सपरिकर ज्ञानवान् विद्वानों का सहवास करते हुये प्रतिदिन धर्म, अर्थ, काम और मोक्ष रूप फल को देनेवाली भक्ति को सिञ्चित करनेवाली अति उदार सर्वेश्वर श्रीरामजी का दिव्य चरित बोधक श्रीमद्रामायण आनन्दभाष्यादिक कथा का श्रवण करें। जो यह भगवान् की कथा अनेक जन्मोपार्जित संसार परम्परा है उस संसार का विनाश करनेवाली है अतः उस कथा का श्रवण करें ॥४॥

तत्राप्यशक्तास्तु कुटीरमात्रं विधाय कुर्युस्त्वथ राघवाद्रौ ।
अन्यत्रवासं च गुरूपदिष्टान् मन्त्राञ्जपन्तो ह्यभिमानशून्याः ॥५॥
भक्त्यादियुक्तस्य तथाऽनहङ्कृतेर्महात्मनस्तस्य निदेशपालनम् ।
उपायमेनं चरमं निरन्तरं सुवैष्णवोऽयं विदधात्वतन्द्रितः ॥६॥
तदर्थपुष्पप्रचयेन सन्ततं तथैव तन्मन्दिरमार्जनादिना ।
तदीयनामाभ्यसनेन तन्मनाः क्षिपेत्सकालं नितरां गतालसः ॥७॥
तीर्थेषु वासेन सतां महात्मनां समागमेनाथ तदर्चनेन ।
जिज्ञासया तद्यशसः श्रवेण तच्छ्रावणेन स्मरणेन तस्य ॥८॥

आनन्दभाष्य श्रीमद्रामायण भागवतादि ग्रन्थों का स्वयं प्रतिदिन पारायण करने में असमर्थ महात्मागण राघवाद्रि चित्रकूट पर्वत पर अथवा श्रीअयोध्याजी जनकपुर वगैरह प्रदेशों में छोटी सी कूटियाँ बना करके (कुटिर-झोंपड) अभिमान शून्य होकर के आचार्य गुरु के द्वारा उपदिष्ट जो तारकादि मन्त्रराज हैं उनका जप करता हुआ पुण्य क्षेत्र में निवास करें। जीवन पर्यन्त पुण्य क्षेत्र में वास करता हुआ जप करें ॥५॥

ज्ञानयोग कर्मयोग तथा भक्तियोग रूप मोक्ष का अति महत्वास्पद साधनों से युक्त सर्वथा अहङ्कार-अभिमान विवर्जित जो महाभागवत श्रीवैष्णव हैं उनका जो उपदेश जिस अधिकारी के लिये जैसा कहा गया है उस आज्ञा का पालन आलस्य रहित होकर के करना चाहिये। इस अन्तिम उपाय-साधन को निरालसी मोक्षेच्छु श्रीवैष्णव निरन्तर पालन करें ॥६॥

मोक्ष कामनावान् श्रीवैष्णवगण सर्वदा आलस्य वर्जित होकर के सर्वेश्वर श्रीरामजी के पूजन निमित्त फूल तुलसी प्रभृतिक पूजोपकरण का संग्रह करते हुए तथा मन्दिर भगवान् के आलय को संमार्जित करते हुये एवं भगवान् के "श्रीराम जय राम जय जय राम" इत्यादि नामको सर्वदा रटन करते हुए अहोरात्रात्मक कालका क्षेप करे ॥७॥

पूर्व कथित श्रीअयोध्याजी जनकपुर काशी चित्रकूट मथुरा प्रभृतिक पवित्र तीर्थ स्थानों में भगवान् श्रीरामजी का यथा मिलितोपचार से पूजन करके निवास करने से तथा ज्ञात तत्वत्रय महात्मा श्रीवैष्णवों का आगमन से तथा आगत तादृश महात्माओं का अर्घ्य आदि प्रदान द्वारा पूजन करने से एवं जगत् का परं कारण सर्वेश्वर श्रीरामजी

रामस्य साङ्गस्य सपार्षदस्य सीतासमेतस्य सहानुजस्य ।
कैङ्कर्यमीर्ष्या रहितः प्रभुर्वन् क्षिपेत् स्वकालं सततं सुभक्तः ॥९-२४॥

॥ भिक्षाचर्यम् ॥

ततः यथा श्रीसम्प्रदायं, कालक्षेपं विधाय मध्याह्नसमये समुपस्थिते स्नानादिकं सन्ध्यावन्दनान्तं कर्मपरिसमाप्य जीवनयात्रा निर्वाहार्थं भैक्षम् आहरेत । "ॐआपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् । पुनन्तु ब्रह्मण स्पतिर्ब्रह्मपूता पुनातु माम् । यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहं स्वाहा । इति मन्त्रेणाचम्य-भिक्षार्थं गच्छेत् तदुक्तं बृहदारण्यके काठके अन्येषु च उपनिषत्सु-

के जानने की इच्छा से भगवान् की श्रीमद्रामायणादिक कथाओं का श्रवण करने से अर्थात् स्वयं समागत श्रीवैष्णवों से सुनने तथा श्रुत कथा का श्रवण दूसरे को करावे । तथा कथादि द्वारा श्रुत जो जगत कारण भूत सर्वेश्वर श्रीरामजी हैं उनका सतत चिन्तन अनुध्यान से तीर्थवासी श्रीवैष्णव अपने काल को बितावें ॥८॥

उपर्युक्त तीर्थादिक स्थानों में निवास करते हुए सर्वेश्वर श्रीरामजी के सुभक्तगण इर्ष्या रहित होकर के अङ्ग देवता पार्षद सहित श्रीसीताजी तथा भरतादिक अनुजों से युक्त भगवान् श्रीरामजी का कैङ्कर्य को करते हुए कालक्षेप करें ।

विष्णुभक्त योगी लोग तथा ऋषियों ने श्रीहनुमानजी से पूछा-कि श्रीरामजी के अङ्ग देवता कितने हैं तथा कौन-कौन हैं ? इस प्रश्न के उत्तर में श्रीहनुमानजी ने कहा कि वायु पुत्र विघ्नेश, वाणी, दुर्गा क्षेत्रपाल, सूर्य, चन्द्रमा, नारायण, नरसिंह, वासुदेव, वराह स्वशक्ति सहित ये सव श्रीसीताजी श्रीलक्ष्मणजी, श्रीभरतजी, श्रीशत्रुघ्नजी, श्रीविभीषणजी, श्रीसुग्रीवजी, अङ्गद, जाम्बवान् और प्रणव-ये सव श्रीरामजी के अङ्ग देव कहे गये हैं । "श्रीरामरहस्योपनिषत्" ॥९-२४॥

卐 भिक्षाचर्या 卐

इसप्रकार श्रीवैष्णव संन्यासाश्रमी अपने श्रीसम्प्रदाय एवं गुरु परम्परा तथा योग्यता के अनुसार सभी प्रकार के सन्ध्यावन्दन सम्बन्धी कर्तव्य कलाप सम्पन्न करलेने के पश्चात् कालक्षेप (सत्संग अध्ययन आदि) सम्पादन करे मध्याह्न समय उपस्थित होने पर पुनः स्नान से लेकर सन्ध्यावनदन पर्यन्त समस्त संन्यासाश्रमोचित

"तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति ॥"

"त्रिषुवर्णेष्वेकागारं भैक्षमश्नीयात् ॥"

"यतयो भिक्षार्थं ग्रामं प्रविशन्ति पाणिपात्रमुदरपात्रं वा ॐहि ॐहि ॐहीत्येतदुपनिषदं विन्यसेद्विद्वान्य एवं वेद ॥"

"औषधवदशनमाचरेत् । भिक्षार्थी ग्रामं प्रविशेत् ॥"

तथा च श्रीबौधायनः-

"भैक्षं वा सर्ववर्णेभ्य एकान्नं वा द्विजातिषु । इत्थं भिक्षान्नस्यातिपवित्रत्वात् भिक्षाचरणं यतिभिरवश्यमेव विधेयम् । अत्र विषये धर्मशास्त्रकार वचनानामयं निर्गलितार्थः । प्रमादरहितः सन् यत्र अन्योभिक्षुको न गच्छेत् तत्र अलोलुपः सन् शरीरयात्रा निर्वाहार्थ भैक्षं चरेत् । ऊर्ध्वरेता संन्यासिस्थिर स्वभावः सन् भिक्षार्थी ग्राममभिगच्छेत्, तत्र गत्वा सप्तागारान् गत्वा तत्र तत्र भिक्षां गृह्णीयात् । यस्मिन् गृहे केनाप्यन्येन भिक्षुणा भिक्षाकृता तं पूर्वभिक्षितं जनं न भिक्षयेत् । भिक्षाग्रहणसमये यज्ञोपवीती सोदककमण्डलुहस्तः ब्राह्मणः यतिः शूद्रान्नं वर्जयेत् । याचितायाचिताभ्यां च भिक्षाभ्यां स्वात्मनो कर्तव्य कलाप का सम्पादन कर जीवन यात्रा का निर्वाह करने के लिये न कि जिह्वा की लोलुपता या पेट भरने की वृत्ति से भिक्षा का संग्रह करे । ॐआपः पुनन्तु पृथिवीं...इस मन्त्र से आचमन कर, भिक्षा याचना हेतु प्रस्थान करे ।

इस विषय वस्तु का बृहदारण्यक, काठक तथा अन्य उपनिषदों में भी निरूपण किया गया है । उस परम तेज स्वरूप आत्म तत्त्व को देव गुरु कृपा से भली भाँति जानकर ब्राह्मण समुदाय, सन्तान सम्बन्धी अभिलाषा, धनाभिलाषा और संसार में प्रतिष्ठा आदि की अभिलाषा आदि से विशेष रूपसे ऊपर उठकर अर्थात् इन सभी आशाओं का परित्यागकर भिक्षाचरण वृत्ति सम्पादन करते हैं ।

ब्राह्मण क्षत्रिय वैश्य इन तीनों वर्णों के घरों में एक घर की भिक्षा से उपलब्ध अन्न को भोजन करे । केवल पाणिपात्र वाले अथवा उदर मात्र पात्रवाले संन्यासीगण भिक्षा ग्रहण करने के लिये गाँव में प्रवेश करते हैं । केवल ॐकार का भिक्षा में प्रयोग करते हैं, एवं तत्त्वज्ञानी ॐकार मात्र को जानते हैं । जिसप्रकार जीवन रक्षा

निर्वाहं कुर्यात् । अनिन्द्यं गृहमेव गच्छेत् निन्द्यञ्च गृहं सर्वथा वर्जयेत् । अनुद्विग्ना जना यत्र ददति तस्मिन्नेव गृहे प्रयासपूर्वकं गच्छेत् । समुद्घाटिते द्वारे भिक्षार्थं गृहं प्रविशेत् । द्वारे आवृते तु न व्रजेत् । क्वचिद् यतिः भिक्षार्थं शब्दं कृत्वा द्वारं नोद्घाटयेत् न वा घोषयेत् न च ताडयेत् । रन्ध्रेण च कदाचित् न भिक्षेत् । भिक्षाग्रहणस्य विधानमुक्तं श्रीबौधायनेन-

त्रिदण्डं दक्षिणेत्वङ्गे ततः संधाय बाहुना ।
पात्रं वामकरेक्षिप्त्वा श्लेषयेद् दक्षिणेन तु ॥

उक्तञ्चादित्यपुराणे-मेध्यं भैक्षं चरेन्नित्यं सायाह्ने वाग्यतः शुचिः । एक वासा विशुद्धात्मा मन्दगामी युगान्तदृक् । असंस्कृतया कन्यया प्रदत्तां भिक्षां रजस्वलाया च प्रेरितां, प्राण्यङ्गेन, आयसपात्रेण च प्रदत्तां भिक्षां श्रीवैष्णवो यतिर्नगृह्णीयात् । यो जनः स्वात्मानं पीडयित्वा स्वल्पमन्नं प्रयच्छति । पञ्चदिन पर्यन्तं सप्तदिनपर्यन्तमपि भीक्षितं यो न प्रददाति तस्य गृहस्य यतिना परित्यागो विधेयः । यतो हि छान्दोग्येऽभिहितम्→आहारशुद्धौ सत्वशुद्धिः
के लिये औषधि खाते हैं । उसकी मात्रा भी स्वल्प होती है, उसीप्रकार संन्यासी भोजन क्रिया को करे ।

भिक्षा की अभिलाषा से ग्राम में प्रवेश करे इत्यादि उपनिषद् वचनों के प्रमाणानुसार संन्यासी को भिक्षाचरण करना चाहिये यह प्रमाण सिद्ध है । और जैसा कि आचार्य श्रीबौधायनजी अपने धर्मशास्त्र में कहते हैं-भिक्षा संन्यासियों को सभी वर्णों से लेनी चाहिये । अथवा द्विजाति के घरों से एक का अन्न भिक्षा में ग्रहण करनी चाहिये । इसप्रकार श्रुतिस्मृति वचनों से प्रतिपादित होता है कि भिक्षा के अन्न को अतिशय पवित्र होने के कारण उनके द्वारा भिक्षाचरण अवश्य किया जाना चाहिये । इस भिक्षाचरण के सम्बन्ध में धर्मशास्त्रकारों के वचनों का यह शारांश है-निरालस होकर सावधानी से जिस घरमें दूसरा भिक्षुक भिक्षा के लिये नहीं गया हो वहां अलोलुप होकर केवल शरीर यात्रा का निर्वाह करने के लिये अर्थात् जीवन का संकट उपस्थित नहीं हो इसलिये भिक्षाचरण करे । केवल परब्रह्म तत्त्व का परिशीलन करनेवाला ऊर्ध्वरिता संन्यासी पूर्ण दृढ़ स्वभावशील होकर, जिसमें लोभ मोह मान मद ईर्ष्या का उदय नहीं हो ऐसे भिक्षा की कामना से गाँव की ओर जाय । अन्य किसी

सत्वशुद्धौ ध्रुवास्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः ॥ यवागू तक्रं पयो यावकं फलं मूलं विपक्कं कणपिण्याकं सक्तवश्च सन्यासिनां मोक्षसिद्धि दायका शुभा आहाराः कथिताः । पत्रं पुष्पं ग्राम्यमारण्यं वा फलं तक्रं दधि शाकञ्च लघुपाकित्वात् प्रशस्ता भिक्षा उच्यते ।

भिक्षाम् अनेकेभ्यो गृहेभ्यो याचयित्वा, समानीय पादौ प्रक्षाल्य आचम्य त्रिः प्राणायामं विधाय, भैक्षम् ॐइत्युक्त्वा जलेन संप्रोक्ष्य दक्षिणेन करेण स्पृष्ट्वा प्रणवेन अभिमन्त्र्य अश्नीयात् । तदुक्तं विष्णुस्मृतौ-

उत्तानवदनं कृत्वा ब्रह्मभावेन भावितः ।
पञ्चप्राणाहुतीर्दद्यान्मन्त्रैस्तु श्रुतिचोदितैः ॥
ॐकारपूर्वाः स्वाहान्ता मन्त्रास्तैस्तत् समाचरेत् ।
नैवाहुतीः स्पृशेद् योगीदन्तौष्ठाभ्यां कदाचन ॥
न स्पृशेत् सव्यहस्तेन भुञ्जानोऽन्नं कदाचन ।
न पादौ न शिरो वस्तिं न पदा भाजनं स्पृशेत् ॥

सांसारिक प्रयोजन से ग्राम में प्रवेश नहीं करें। गाँव में प्रवेश करके सात घरों में केवल जाकर उनमें भिक्षा का नियमानुसार ग्रहण करे। जिस घर में किसी अन्य भिक्षुक के द्वारा भिक्षा की गयी है ऐसे पूर्व भीक्षित मनुष्य से भिक्षा याचना नहीं करे। भिक्षा लेने के समय में यज्ञोपवीती (जनेऊ वाले) संन्यासी को पानी से भरा हुआ कमण्डलु हाथ में धारण किये रहना चाहिये। ब्राह्मण संन्यासी भिक्षा करते समय शूद्र के अन्न का ग्रहण न करे। भिक्षा याचना करने पर अच्छा कहकर जो भिक्षा मिलती है उसे याचित कहते हैं। विना याचना किये ही स्वयं भावना पूर्वक किसी के द्वारा भिक्षा दी जाती है उसे अयाचित कहते हैं। मांगी हुई या विना मांगी हुई मधुकरी वृत्ति से प्राप्त भिक्षा से निर्वाह करे। जिसका घर लोक अथवा शास्त्र से निन्दा नहीं करने योग्य हो उसी घर में भिक्षा करें। आचार विचार तथा धर्म आदि की दृष्टि से जिसका घर निन्दनीय हो उस घर को भिक्षा ग्रहण में सर्वथा परित्याग करे। जहां पर भिक्षा देनेवाले व्यक्ति धन अन्न अथवा किसी अन्य कारण घवडाये हुए नहीं हो उसी घर में भिक्षा करे, उद्वेग युक्त व्यक्ति के घर में भिक्षा नहीं करे। यह प्रयास करे कि जिस घर के लोग प्रसन्न हो किसी संकट से ग्रस्त नहीं हों वहीं भिक्षा करे।

स्वात्मनः स्थित्यर्थमेव भिक्षाटनं निवृत्ते शरावसंपत्तिं चरेत् । यावता अन्नेनात्मनः तृप्तिं स्यात् तावदेवान्नं भिक्षेत् । नाधिकं कदाचन भिक्षेत् । ब्राह्मणसन्यासिनां द्विजातिरिक्तगृहे भिक्षा न कर्तव्येति पूर्वं निरूपितम् । तत्रेदमुच्यते

द्विजाभावे तु सम्प्राप्ते उपवासत्रये गते ।
भैक्षं शूद्रादपि ग्राह्यं रक्षेत् प्राणान् द्विजोत्तमः ॥

विष्णुस्मृतौ चोक्तम्-

स्ववृत्तस्य गृहे भिक्षेन्नतु तेष्वेवनित्यशः ।
अभावे वहुगेहानां तेषु भिक्षेदलोलुपः ॥

जिसका घरका द्वार खुला हुआ है उसी के घर में भिक्षा करने के उद्देश्य से प्रवेश करे। घरका दरवाजा यदि वन्द है तो भिक्षा के लिये वन्द दरवाजा वाला घर में जाने का प्रयास नहीं करे, कहीं पर भी संन्यासी अपने भिक्षा हेतु उपस्थिति की ध्वनि न करे, तथा आवाज देकर अथवा द्वार खटखटा कर द्वार नहीं खुलाये । किसी खिडकी या गृह छिद्र से भिक्षा ग्रहण नहीं करना चाहिये । भिक्षा ग्रहण करने का विधान आचार्य श्रीबौधायनजी के द्वारा कहा गया है-

संन्यासी भिक्षा काल में दक्षिण भाग में त्रिदण्ड रखकर तत्पश्चात् दाहिनी भुजा से उसे सम्भालकर भिक्षापात्र वाँया हाथ में रखकर उस पात्र से दाहिना हाथ का स्पर्श करावे और आदित्य पुराण में कहा भी गया है कि दिन के दूसरे भाग में अर्थात् दोपहर वाद पवित्र एवं मौन रहता हुआ प्रतिदिन पवित्रता आदि गुणों से युक्त अन्न की भिक्षा करे। उस समय एकमात्र वस्त्र हो मन्द मन्द गति हो आत्मा अत्यन्त शुद्ध हो एवं युगान्त दर्शी हो । जिस कन्या का वैवाहिक संस्कार नहीं हुआ है ऐसी कन्या के हाथ से प्रदान की गयी भिक्षा को संन्यासी ग्रहण नहीं करे। तथा रजस्वला स्त्री के द्वारा प्रेरित किसी अन्य व्यक्ति के हाथ से भिक्षा ग्रहण नहीं करे। किसी प्राणी के अवयव द्वारा दी गयी भिक्षा, अथवा लौह पात्र से प्रदान की गयी भिक्षा को संन्यासी स्वीकार कदापि न करे। कोई संन्यासी भिक्षा करने आगया ऐसी स्थिति में दुःखी होकर स्वयं को पीडितकर जो स्वल्प मात्रा में भिक्षा प्रदान करता है अथवा लगातार पाँच दिन पर्यन्त अथवा सात दिन पर्यन्त भिक्षा मांगने के लिये उपस्थित होने पर भी भिक्षा प्रदान

दर्व्या देयं घृतं चान्नं लवणं व्यञ्जनं तथा ।
अपक्वं स्नेहपक्वं च नतु दर्व्या कदाचन ॥
हस्तदेयं तु यद्दर्व्या दर्व्यादेयं तु हस्ततः ।
एतद् यो ब्राह्मणोऽश्नीयात् सोऽश्नीयान्मूत्ररेतसी ॥
गङ्गातोयाभिषिक्तां तु भिक्षायोऽश्नाति योगवित् ।
न तत् क्रतु शतैरिष्ट्वा फलं प्रप्नोति मानवः ॥
सान्तपनसहस्त्रं तु चान्द्रायणशतानि च ।
अश्वमेधाष्टकं चैव तद्विष्णोः शेषमुत्तमम् ॥

नहीं करता है। उस घरका सर्वथा भिक्षा हेतु परित्याग करदे, क्योंकि भिक्षा नहीं देने की भावना उस गृहपति की प्रमाणित होती है। क्योंकि छान्दोग्य उपनिषद् में कहा गया है→भोजन की पवित्रता होने पर अन्तःकरण की पवित्रता होती है। अन्तःकरण पवित्र होने पर संसार के समस्त नश्वर बन्धन अपने आप छूट जाते हैं। अतः संन्यासियों को भिक्षान्न की पवित्रता हेतु सजग रहना चाहिये।

लस्सी छाछ दूध, दलिया, फल मूल पिण्ड, खजूर सत्तू ये सभी अन्न संन्यासियों के लिये मोक्ष सिद्धि दायक शुभ आहार कहे गये हैं। पत्र पुष्प ग्रामीण, अथवा जङ्गली फल, तक्र दही और शाक ये सभी भक्ष्य लघुपाकी (सरलता से पचने योग्य) होने के कारण प्रशंसनीय भिक्षा कही गयी है।

अनेक घरों से याचनाकर लायी गई भिक्षा को सम्यक् प्रकार से लाकर, पैरों को धोकर आचमन करके तीनवार प्राणायाम करने के वाद सम्मिलित भिक्षा समूह को "ॐ" इस प्रणव का उच्चारण कर अभिमन्त्रित करके संन्यासी भोजन करे। यह विषय विष्णु स्मृति में कहा गया है। मुखको ऊपर की ओर उत्तान करके ब्रह्म की भावना से संस्कारित होकर ॐप्राणाय स्वाहा, ॐअपानाय स्वाहा, ॐसमानाय स्वाहा, ॐउदानाय स्वाहा, ॐव्यानाय स्वाहा इन पाँच मन्त्रों से पञ्च प्राणों को आहुति प्रदान करे। प्राणाहुति देने में उपर्युक्त वेद सम्मत मन्त्र होना चाहिये। यह आहुति पाँचो प्राणों के लिये संन्यासी के द्वारा अपने मुख में ही होना चाहिये। किन्तु आहुति के अन्न को दाँत और ओठों से योगी स्पर्श नहीं करे। आहुति में ॐकार पूर्वक एवं स्वाहान्त मन्त्र का उच्चारण करना चाहिये। भिक्षान्न को भोजन करते हुये संन्यासि

विष्णोर्नैवेद्यसंशुद्धं मुनिभिर्भोज्यमुच्यते ।
अन्यदेवस्य नैवेद्यं भुक्त्वा चान्द्रायणं चरेत् ॥
गङ्गातोयञ्च भैक्षञ्च वैष्णवान्नं विशेषतः ।
आनश्वान्मोचरेत् पापं मन्त्रपूतं हविर्यथा ॥
गङ्गयाः सलिलं पुण्यं शालग्रामशिला तथा ।
भिक्षान्नं पञ्चगव्यञ्च पवित्राणि युगे युगे ॥

विष्णुस्मृतौ चोक्तम्-
न भिक्षायां भवेद्दोषो न भिक्षा स्यात् प्रतिग्रहः ।
सोमपानसमा भिक्षा तस्मादहरहश्चरेत् ॥

को किसी भी परिस्थिति में वांया हाथ से अन्न को नहीं छुना चाहिए। नहीं पैरों को न शिर को अथवा वस्त्र को स्पर्श करे तथा पैर से पात्र का स्पर्श भी न करे।

संन्यासी अपने आप के देह संरक्षण के लिये ही जब घरों में बर्तन की आवाज वन्द हो जाय। अर्थात् घर वालों का भोजनादि सम्पन्न हो चुका हो उस समय में भिक्षाटन करे। जितने अन्न से अपनी तृप्ति सम्पन्न हो उतनी ही भिक्षा करे। अधिक अन्न संग्रह करने की इच्छा से कभी भी भिक्षा नहीं करे। ब्राह्मण संन्यासी के द्वारा ब्राह्मण क्षत्रिय तथा वैश्य के अतिरिक्त अन्य घर में भिक्षा नहीं करनी चाहिये यह पहले प्रतिपादन किया जा चुका है। इस सम्बन्धित विषय में कहा जाता है कि जहां द्विजाति का अभाव हो ऐसी परिस्थिति उत्पन्न होने पर तीन दिन उपवास करते हुये बीत जाने पर ब्राह्मण श्रेष्ठ संन्यासी अपने प्राणों की रक्षा करने के लिये शूद्र के घर से भी भिक्षा कर सकता है। और विष्णु स्मृति में कहा है→अपने समान आचार विचार धर्म वाले गृहस्थों के घर में भिक्षा करनी चाहिये, किन्तु प्रतिदिन उन्हीं घरों में भिक्षा नहीं करनी चाहिये। किन्तु यदि समान धर्मवाले लोगों के बहुत घर नहीं हो तो उन्हीं घरों में लोलुपता से रहित होकर अर्थात् उदासीन भाव से भिक्षा करे। करछुला से देने योग्य घृत अन्न व्यञ्जन तथा लवण की करछुल से ही ग्रहण करे। किन्तु जो नहीं पकाने योग्य है ऐसा अन्न अथवा तेल में पका हुआ अन्न कभी भी करछुल से देने पर स्वीकार नहीं करे। हाथ से देने योग्य वस्तु को तो जो करछुल से स्वीकार करता है तथा करछुल से देने योग्य अन्न को जो हाथ से स्वीकार करता है इसतरह के अन्न को

आहारस्य तु द्वौ भागौ तृतीयमुदकस्य च ।
वायोः सञ्चारणार्थाय चतुर्थमवशेषयत् ॥

भोजनावसाने च षोडशप्राणायामान् कुर्यात् । ततो जपध्यानेतिहास कथावार्तादिभिः दिनशेषं गमयेत् ।

सामान्यलोकस्यापि श्रीमद्रामायणपुराणेतिहासकथादिभिर्धर्म प्रवृत्तिर्जायते । तेषु भगवद्भक्तिजननार्थं लोकस्य धर्माभ्युदयार्थञ्च श्रीमद्रामायणेतिहासपुराणादीनां यतिः कथां कुर्यात् । तदुक्तं श्रीगीतायाम्-

जो ब्राह्मण भोजन करे वह मूत्र एवं वीर्य का ही भोजन करता है ।

जो योग तत्व वेत्ता संन्यासाश्रमी गङ्गाजल से अभिषिक्त भिक्षा को भोजन करता है उसमें जो पुण्य लाभ होता है वह पुण्य फल सैकडों यज्ञ करके भी मानव नहीं प्राप्त करसकता है । एक हजार सातवन व्रत और एक सौ चान्द्रायण व्रत आठ अश्वमेध यज्ञ सम्पादन करने का जो पुण्य फल प्राप्त होता है उसकी तुलना में भगवान् विष्णु के प्रसाद का सेवन करना श्रेष्ठ है । भगवान् श्रीरामजी का नैवेद्य सम्यक् प्रकार से विशुद्ध कहा गया है । तथा संन्यासियों के द्वारा भोजन करने योग्य है ऐसा कहा जाता है । श्रीरामजी से अतिरिक्त अन्य देवता का नैवेद्य को पाकर प्रायश्चित्त रूप में चान्द्रायण व्रत करे । इससे यह सिद्ध होता है कि भगवान् का प्रसाद यदि उपलब्ध हो तो गृहस्थों के घर में भिक्षा नहीं भी की जा सकती है । विशेष रूपसे गङ्गाजल और भिक्षा समूह का अन्न तथा वैष्णव का अन्न नख से आरम्भ कर समग्र शरीर को पवित्र करता है । जिस प्रकार मन्त्र से पवित्र हविष्यान्न मानव के समग्र शरीर को पवित्र करता है । गङ्गा का जल पुण्यजनक शालग्राम की शिला भिक्षा का अन्न और पञ्चगव्य ये सभी प्रत्येक युग में पवित्र कहे गये हैं ।

और विष्णु स्मृति में भी कहा गया है, भिक्षा में दोष नहीं होता है और भिक्षा का अन्न प्रतिग्रह नहीं कहा जाता है । यज्ञ में सोमरसपान के समान भिक्षा का अन्न कहा गया है । अतः प्रति दिन भिक्षाटन करना चाहिये । भिक्षान्न भोजन करते समय उदर के दो भाग को अन्न से भरना चाहिये । तीसरा भाग पानी से भरना चाहिये और वायु का सञ्चार करने के लिये चौंथा भाग खाली रहने देना चाहिये । भोजन सम्पन्न करलेने के पश्चात् अन्त में सोलहवार प्राणायाम करे । तत्पश्चात् फुर्सत होने पर जप

नाहं वेदैर्न तपसा न दानेन न चेज्यथा ।
शक्य एवं विधो द्रष्टुं दृष्टवानसि मां यथा ॥
भक्त्या त्वनन्यया शक्यमहमेवं विधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥

ततः सायंकाले सूर्यास्तमनात् पूर्वं स्नात्वा पूर्वोक्तक्रमेण सन्ध्यामुपास्य सूर्यायार्घ्यं च प्रदाय कर्मसमर्पणं श्रीरामचन्द्राय विधाय । सूर्योपस्थानं तत् समर्पणं च सर्वदेवमयाय श्रीरामाय कृत्वा, वेदोपनिषत् श्रीमद्रामायणप्र भृतीनां स्वाध्याय योग्यानांग्रन्थानामध्ययनं विधाय जपहोमदेवतार्चनादिभिः ध्यान श्रीमद्रामायण इतिहास और पुराण की कथावार्ता आदि से अवशिष्ट समय को वितावे । ऐसा देखा जाता है कि सर्व साधारण मनुष्य की भी श्रीमद्रामायण इतिहास पुराणादि सम्बन्धि धार्मिक कथाओं में प्रवृत्ति उत्पन्न होती है । अतः साधारण अनपढ लोगों में भी भक्ति भावना जागृत करने के लिये एवं संसार का धार्मिक अभ्युदय करने के लिये श्रीमद्रामायण इतिहास पुराण आदि की कथा श्रीवैष्णव सन्यासी करे। यही विषय गीता में भगवान् श्रीकृष्णजी अपने श्रीमुख से कहते हैं कि–मैं वेद शास्त्रों से तपस्या से दान से एवं यज्ञ याग आदि से उतना प्रसन्न नहीं होता हूँ तथा मुझे नहीं जाना जासकता है जितना कि इसप्रकार भक्तिभावना द्वारा मुझे देख सकते हो। हे अर्जुन ! इसप्रकार के गुणगण से परिपूर्ण मुझको अनन्य भक्तिभाव से ही देखा एवं जाना जा सकता है । तात्विक रूपसे जानने देखने एवं तात्विक रूपसे श्रीराम तत्त्व में प्रवेश करने के लिये अनन्य भक्ति को छोडकर दूसरा योग्य साधन नहीं है अतः जनसमुदाय में भक्तिभाव उत्पन्न करने के लिये श्रीमद्रामायण एवं पुराण कथा आदि की वार्ता से श्रीवैष्णव संन्यासी को कालक्षेप करना चाहिये ।

तत्पश्चात् सायं काल में भगवान् सूर्य के अस्ताचल पर जाने से पहले स्नान करके पूर्व वर्णित क्रम से सन्ध्योपासन से आरम्भकर सूर्य को अर्घ्य देकर एवं भगवान् श्रीरामचन्द्रजी को कर्म समर्पण करके सूर्योपस्थान तथा उसका समर्पण सर्वदेव स्वरूप भगवान् श्रीरामजी को निवेदन कर वेद उपनिषद् आदि ग्रन्थों का अथवा स्वाध्याय करने योग्य जगदाचार्यजी से निर्दिष्ट अन्य ग्रन्थों का अध्ययन करके जप होम तथा

रात्रेः प्रथमं यामं नयेत् । देवमन्दिरे निवसन् भगवत् प्रसादस्वरूपं भोज्यं भुक्त्वा, शतं प्राणायामान् विधाय शयनं कुर्यात् । निशायाः पश्चिमे प्रहरे उत्थाय पुनः ब्रह्माभ्यासमारभेत् । तदुक्तम्-

देवोद्याने साधुगृहे महालयसरित्सु च । रात्रौ गृह्णन्न दुष्येत तटाके विमले ह्रदे ॥

यतिः यथाशक्ति यथावशरं च मोक्षकामनया-यमनियमासनप्राणायाम प्रत्याहारधारणाध्यानसमाधीनां योगशास्त्रोक्तदिशा अभ्यासं कुर्यात् । सम्यग् दर्शनसाधनत्वेन तेषां विधानात् । एतेषां स्वरूपनिरूपणं ग्रन्थान्तरेषु कृतम् ततः एव तज्ज्ञानं विधेयम् ॥२५॥

इति आनन्दभाष्यसिंहासनासीनस्य जगद्गुरुश्रीरामानन्दाचार्यश्रीरामेश्व रानन्दाचार्यस्यकृतौ श्रीवैष्णवसंन्यास मीमांसायां यतीनां दिनचर्या निरूप णात्मकः प्रकरणः सम्पन्नः । शुभं भूयात् ॐ

सर्वेश्वर श्रीरामजी का पूजन आदि से रात्रि का प्रथम पहर वितावें । तत्पश्चात् देवता के मन्दिर में निवास करते हुये भगवद् प्रसाद स्वरूप फलादि को भोजन करके एक सौ प्राणायाम कर शयन करे । रात के अन्तिम पहर में उठकर पुनः ब्रह्म साक्षात्कार का अभ्यास प्रारम्भ करे यही वात शास्त्रों में कही गयी है कि देवताओं के मन्दिर में साधु पुरुष के स्थान में महालय और नदियों में तालाब तथा निर्मल ह्रद में रात्रि के समय भी भोजन करता हुआ दूषित नहीं होता है ।

संन्यासी अपनी शक्ति एवं अवसर के अनुरूप मोक्ष की अभिलाषा से यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि का योग शास्त्र के कथनानुसार अभ्यास करे । क्योंकि उपर्युक्त योगाङ्गों का सम्यक् दर्शन का साधन होने के कारण विधान किया गया है । इन यम, नियम, आदि का अन्य ग्रन्थों में स्वरूप प्रतिपादन किया गया है । पाठकों को उन्हीं ग्रन्थों से इनका ज्ञान करना चाहिये ॥२५॥

इसप्रकार आनन्दभाष्यसिंहासनासीन जगद्गुरु श्रीरामानन्दाचार्यश्रीरामेश्वरानन्दा चार्यजी की कृति श्रीवैष्णव संन्यासमीमांसा में संन्यासियों के भिक्षा-दिनचर्या प्रतिपादन स्वरूप यह प्रकरण परिपूर्ण हुआ ।

ॐ

ॐ संन्यासदीक्षाधिकारः त्रिदण्डधारणाधिकारश्च ॐ

सीताभिन्नं रामचन्द्रं रामानन्दं यतीश्वरम् ।
गुरुं रामप्रपन्नं च प्रणमामि पुनः पुनः ॥१॥

यथा कुलालो घटरचनायां समर्थो न पटरचनायां तेन कुलालस्य घटनिर्माणेऽधिकारः, स्वर्णकारो भूषणनिर्माणेऽधिकृतः, तन्तुवायश्च पटेऽधिकृतो भवति, एवञ्च यो यत्र जातिस्वभावादेव येषु येषु कार्येषु दक्षो भवति तस्य तत्राधिकारो लोकव्यवहारसिद्धः प्रेक्षावद्भिरवलोक्यते, एवमेव चत्वार आश्रमाः सन्ति । तेषु आश्रमेषु समेषां मानवानां अधिकारो नवेति विविच्य प्रवेशाय जिज्ञासायां विषयेऽस्मिन् वर्णाश्रमाचारभेदेन लोकव्यवहारादेव अधिकारसिद्धिर्विलोक्यते । यथा शिशोः संन्यासिनश्च विवाहाधिकारो नास्ति, शिशोरयोग्यत्वात् संन्यासिनश्च उच्चाश्रमादधः पतने शास्त्रविरोधात्

卐 संन्यासदीक्षाधिकार तथा त्रिदण्डधारणाधिकार 卐

जगज्जननी श्रीसीताजी से अभिन्न श्रीरामचन्द्रजी यतिराज आनन्दभाष्यकार श्रीरामानन्दाचार्यजी और गुरुवर योगीन्द्र श्रीरामप्रपन्नाचार्यजी महाराज को मैं रामेश्वरानन्दाचार्य पुनः पुनः प्रणाम करता हूँ ॥१॥

यह इस संसार में देखा जाता है कि जिसप्रकार कुम्भार घडा आदि मृत्तिका का निर्माण करने में समर्थ होता है, उस प्रकार वस्त्र आदि के निर्माण में समर्थ नहीं होता है। इससे कुम्भकार का घट रचना में अधिकार है। सुनार आभूषण आदि निर्माण में समर्थ होता है इसलिये उसमें अधिकार युक्त होने पर भी घटादि की रचना नहीं कर सकता है। और जुलाहा कपडा बनाने का अधिकारी है, इसप्रकार जो जिस कार्य में अपने जाति स्वभाव से ही जिन जिन कार्यों में दक्ष होता है, उस कार्य में उसका अधिकार लोक व्यवहार में सिद्ध है। ऐसा विषय वस्तु को जानने वाले विद्वानों के द्वारा देखा जाता है। इसीप्रकार ब्रह्मचर्य-गृहस्थ्य, वानप्रस्थ और संन्यास भेद से चार आश्रम हैं। उन उन आश्रमों में सभी मनुष्यों का अधिकार है अथवा नहीं इसका विवेचन कर प्रवेश के लिये जिज्ञासा के इस विषय में वर्ण, आश्रम तथा आचार व्यवहार के भेद से लोक व्यवहार से ही अधिकार सिद्धि देखी जाती है। जिसप्रकार एक बालक और संन्यासी का विवाह करने का अधिकार नहीं है। क्योंकि बालक

केचन पतिताः सन्त अपि गृहस्थाश्रमे विहितप्रवेशाः सन्तानपरम्परामजनयन्, लोकशास्त्रनिन्दां चावहेलनादृष्ट्या विलोक्य संसारसुखमन्वभूवन्। किन्तु लोकेन शास्त्रेण च योग्यस्यैव तत्र तत्राश्रमेषु प्रवेशाय अनुमन्यते। तथा अत्र संन्यासाश्रमप्रवेशे दीक्षाग्रहणे च संन्यासलक्षणभूतस्य त्रिदण्डस्य धारणे काषायवस्त्रपरिधाने, स्वेतवस्त्रपरिधाने च कस्य कस्याधिकारः। कस्यकृते निषेधश्चेति विवेचनमत्यावश्यकम्। अन्यथा व्यवस्थायां दोषोत्पत्तौ सम्प्रदाये समाजे च अव्यवस्थैव व्यवस्था स्यात्। तस्माद् विषयेऽस्मिन् लोकशास्त्रव्यवहारसिद्धये विवेचनं क्रियते। यतिस्वरूपं व्युत्पत्तिं च मेधातिथिराह-

वेदाभ्यासेन यज्ञेन तपसावीतकल्मषः।
विरक्तोमानुषैर्भोगैर्दिव्यैश्चस्मृतिदर्शितैः।

को विवाह करने के अयोग्य होने के कारण और संन्यासी का उच्च आश्रम से निम्न आश्रम में आना यह अधः पतन है, इसमें लोक व्यवहार और शास्त्र का विरोध होने से अधिकार नहीं है। यह देखा जाता है कि कुछ लोग पतित होकर भी गृहस्थ आश्रम में प्रवेश प्राप्त करके अपनी सन्तान परम्परा को उत्पन्न किये। लोक व्यवहार एवं शास्त्र की निन्दा को अवहेलना की दृष्टि से देखकर सांसारिक सुख का अनुभव किये। किन्तु लोक व्यवहार एवं शास्त्र के द्वारा उन-उन आश्रमों के योग्य पुरुष को ही उन-उन आश्रमों में प्रवेश के लिए अनुमति दी जाती है उसीप्रकार इस संन्यासाश्रम में प्रवेश एवं दीक्षा-ग्रहण में संन्यास का विशेष लक्षण बना हुआ त्रिदण्ड के धारण में कषाय रंग में रंगा हुआ वस्त्र पहनने में और श्वेतवस्त्र पहनने में किसका-किसका अधिकार है और किसके लिए निषेध है। इस वस्तु का विवेचन करना अत्यन्त आवश्यक है। यदि ऐसा नहीं करे तो व्यवस्था में दोष उत्पन्न हो जाने पर सम्प्रदाय एवं समाज में अव्यवस्था ही व्यवस्था हो जायगी। इसिलिए इस विषय में विवेचन किया जाता है। संन्यासी का स्वरूप एवं यति शब्द की व्युत्पत्ति को स्मृतिकार मेधातिथि कहते हैं-वेद शास्त्रों का अभ्यास (पुनः-पुनः पठन) यज्ञ और तपस्या के द्वारा जिसका पाप समूह समाप्त हो चुका है। अलौकिक धर्म शास्त्रों के द्वारा दिखाए गये दिव्य मार्ग से जो मनुष्य लोक में होनेवाले भोगों से जो विरक्त हो चुका है।

इतिहासपुराणाभ्यां स्मृत्या च प्रतिबोधितः ॥
यतते परमं स्थानं यतनात् स यतिः स्मृतः ॥

याज्ञवल्क्यश्च-

अधीतवेदोजपकृत् पुत्रवानन्नदोऽग्निमान् ।
शक्त्या च यज्ञकृन्मोक्षे मनकुर्यात्तु नान्यथा ॥

केचित्तु-ब्रह्मचर्याद् वा गृहाद्वावनाद्वा यथाकामं पारिव्राज्यमित्याहुः । जाबालिश्च-ब्रह्मचर्यं परिसमाप्य गृहीभवेत्, गृहीभूत्वा वनीभवेत्, वनीभूत्वा परिव्रजेत् । गृहाद्वा वनाद्वा इत्याह । यमस्त्वाह-

चीर्णवेदव्रतो विद्वान् ब्राह्मणो मोक्षमाश्रयेत् ।
निःस्पृहः सर्वभूतेषु स्थावरेषु चरेषु च ॥
जातपुत्रो गृहस्थो वा विजितात्मा जितेन्द्रियः ।
निःस्पृहः सर्वकामेभ्यः कृतकृत्य परिव्रजेत् ॥

लिखितस्मृतौतु-

सोऽधीतवेदतत्त्वार्थो गृहवासमशक्नुवम् ।
प्रव्रजेदकृतोद्वाहो वनाच्चीर्णो गृहादपि ॥ इत्याह ॥

शङ्खमृतौत्वाह-

एवं नीत्वानवेकालं द्विजोब्रह्माश्रमीभवेत्
नानोपनिषदां ज्ञानात् प्राप्तवैराग्यपारवः ।

इतिहास और पुराण के द्वारा तथा स्मृति के द्वारा जो प्रतिबोधित है, वह सर्वोत्कृष्ट स्थान परमपद स्वरूप मोक्ष प्राप्ति के लिये यत्न करता है । अतः यत्न करने के कारण वह यति कहा जाता है । महर्षि याज्ञवल्क्य भी संन्यास के विषय में कहते हैं-जिसने वेदों का अध्ययन करलिया है, मन्त्रों का जप करने वाला पुत्रवान् अन्नदाता अग्नि उपासना करनेवाला और अपनी शक्ति के अनुसार यज्ञ करनेवाला पुरुष मोक्ष में मन लगावे। अन्यथा संन्यासाश्रम में प्रवेश करने का यत्न नहीं करें । कुछ लोग तो कहते हैं ब्रह्मचर्याश्रम से अथवा गृहस्थाश्रम से अथवा वानप्रस्थाश्रम से अपनी इच्छा के अनुसार संन्यास ग्रहण करना चाहिये । यहां याज्ञवल्क्य एवं अन्य के मत में अन्तर है कि याज्ञवल्क्य क्रमशः सभी आश्रमों को पार करने के वाद संन्यासाश्रम में प्रवेश

समाहृतेन्द्रिय ग्रामो विषयेभ्यः सुदूरतः ।
आत्मैकरामो मनसा निरस्य परिपन्थिनः ।
योगाभ्यासेन बहुशो लब्धात्माऽदृढबन्धनः ।
सर्वसङ्गनिवृत्तात्मा ब्रह्मचार्यपि सुव्रतः ।
एतैर्गुणैरुपेतश्चेत् गृहस्थो वा प्रजायते ।
कृत्वेष्टिं विधिवद्दत्वा सर्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन् समारोप्य द्विजोब्रह्माश्रमी भवेत् । अत्र च मनुः-

की अनुमति देते हैं तथा अन्य किसी भी आश्रम से संन्यासाश्रम में जाने की अनुमति देते हैं। और इस विषय में जाबालि ऋषि कहते हैं-ब्रह्मचर्याश्रम को परिपूर्ण करके गृहस्थ बने। गृहस्थ बनकर वानप्रस्थाश्रमी बने वानप्रस्थाश्रमी होकर संन्यासाश्रमी बनें। अथवा गृहस्थाश्रमी से या वानप्रस्थाश्रम से संन्यासी बने। अर्थात् ब्रह्मचर्याश्रम से नहीं। यम स्मृतिकार तो कहते हैं-कि जो विद्वान् समस्त व्रतों की पूर्ण कर लिया है वह ब्राह्मण आकांक्षा रहित होकर समस्त प्राणियों में स्थावर और जङ्गम में निःस्पृह रहकर इन्द्रियों के ऊपर एवं अपनी आत्मा को वश करके संतान उत्पन्न हो जाने के वाद गृहस्थ भी मोक्ष हेतु संन्यासाश्रम का अवलम्बन करे। लिखित→अर्थ को समझ चुका है वह गृहस्थाश्रम में निवास करने में असमर्थ होता हुआ विना विवाह किये हुए ही ब्रह्मचर्याश्रम से संन्यासाश्रम में जप अथवा व्रत पूर्ण होने पर वानप्रस्थ या गृहस्थ्य से भी संन्यासाश्रम में प्रवेश कर सकता है। शङ्खस्मृति में तो कहा है इसप्रकार वानप्रस्थाश्रम में समय विताकर ब्राह्मण संन्यासाश्रमी बनें जो अनेक उपनिषदों के ज्ञान से वैराग्य में दक्षता को प्राप्तकर लिया है। सुदूर तक जानेवाले इन्द्रियों को विषयों से नियन्त्रितकर चुका है एकमात्र आत्मा में आनन्दानुभूति करनेवाला मन के द्वारा अपने काम-क्रोध, लोभ-मोह आदि आन्तरिक शत्रुओं को दूर करके अनेक वार योगाभ्यास के द्वारा जिन्होंने आत्म साक्षात्कार कर लिया है। जिसका सांसारिक बन्धन ढीला हो चुका है। जिसकी आत्मा सभी तरह की आशक्तियों से दूर हो चुकी है। ब्रह्मचारी होते हुए भी समस्त गुणों से सम्पन्न है इसप्रकार के गुण समुदाय से मण्डित व्यक्ति यदि गृहस्थ भी प्रव्रज्या ग्रहण करना चाहता है वह यज्ञ करके शास्त्रीय विधानानुसार दान देकर सभी वेदों की दक्षिणा सहित दान देकर स्वयं में अग्नि

ऋृणानि त्रीण्यपाकृत मनोमोक्षे निवेशयेत् । श्रुतौ तु-यदहरेव विरजेत् तदहरेव परिव्रजेत् ब्रह्मचर्याद् बा गृहाद् वा वनाद्वा कामं परिव्रजेत् । कुत्र चिदुक्तमन्यत्र द्विजः परिव्रजेदित्युक्तम्, कुत्रचित्-अनाश्रमी न तिष्ठेत् । अन्यत्र आश्रमाणां सर्वेषां नियमानां परिपालनानन्तरं आत्मारामः सन् शब्दादिभ्यो विषयेभ्यो मनसा सर्वाणीन्द्रियाणि निगृह्य परिपक्वकषायः सञ्जातवैराग्यो, योगाभ्यासबलेन प्राप्तात्मज्ञानः प्रारिव्राज्यं गृह्णीयादिति । विविधैः प्रकारैः स्वस्वमतान्युपस्तानि । सर्वेषां समन्वये कृतेऽपि द्विजस्थैव संन्यासेऽधिकार आयाति ते च ब्राह्मणक्षत्रियवैश्या ब्रह्मचर्याद् वा गृहाद्वा वनाद्वा कथञ्चित् पारिव्राज्यमर्हन्ति, शूद्राणाञ्च वेदाध्ययनाधिकाराभावात् पारिव्राज्यमेभिर्वचोभिः कथञ्चिदपि न सिद्ध्यति । स्त्रीणान्तु का कथा । यतोहि मनुना निरूपितम्-वैवाहिकोविधिः स्त्रीणां संस्कारो वैदिकः स्मृतः । पतिसेवा गुरौवासः गृहार्थो अग्नि प्रक्रिया ॥ इति ॥

